पद्—दिवा A. to go. Pre—पद्यते ॥ Pot—पद्येत ॥

Imp—पद्यताम् ॥ Impf—अपद्यत ॥ Perf—पेदे, पेदिषे ॥ Aor—अपादि (अपत्साताम् 3rd Du) ॥ Fu—पत्स्यते ॥ Per Fu—पत्ता ॥ Con—अपत्स्यत ॥ Ben—पत्सीष्ट ॥ Pas—पद्यते, Aor—अपादि ॥ Cau—पादयति, Aor—अपीपदत् ॥ Des—पिपदिषते or पित्सते ॥ Fre—पनीपद्यते ॥ PP—पन्नः ॥ IP—पत्त्वा ॥ Inf—पत्तुम् ॥

पण्- पन् }—भ्वा A. to praise. आभ्यां स्तुत्यर्थे एव आयप्रत्ययः, आयप्रत्ययान्तादेव परस्मैपदम् ॥ लिडादौ आयप्रत्ययो भवति न भवति च ॥ Pre—पणायति, पनायति ॥ Pot—पणायेत्, पनायेत् ॥ Imp—पणायतु, पनायतु ॥ Impf—अपणायत्, अपनायत् ॥ व्यवहाराद्यर्थे—पणते इत्यादि ॥ Perf—पणायांचकार or पेने ॥ Aor—अपणायीत् or अपणिष्ट ॥ Fu—पणायिष्यति or पणिष्यति ॥ Per Fu—पणायिता or पणिता ॥ Con—अपणायिष्यत् or अपणिष्यत् ॥ Ben—पणाय्यात् or पणिषीष्ट ॥ Pas—पण्यते, Aor—अपाणि ॥ Cau—पाणयति, Aor—अपीपणत ॥ Des—पिपणिषते ॥ Fre—पम्पण्यते ॥ PP—पणायितः or पणितः ॥ IP—पणायित्वा or पणित्वा ॥ Inf—पणितुम् or पणायितुम् ॥

पा—भ्वा P. to drink. Pre—पिबामि, पिबसि, पिबति ॥ Pot—पिबेयम्, पिबेः, पिबेत् ॥ Imp—पिबानि, पिब, पिबतु ॥ Impf—अपिबम्, अपिबः, अपिबत् ॥

Perf—पपौ, पपिव ; पपिथ or पपाथ, पपथुः ; पपौ, पपतुः, पपुः ॥ Aor—अपाम्, अपाः, अपात् (अपाताम्, अपुः 3rd Du, and Plu) ॥ Fu—पास्यति ॥ Per Fu – पाता ॥ Con—अपास्यत् ॥ Ben—पेयात् ॥ Pas—पीयते, Aor—अपायि ॥ Cau—पाययति (निगरणार्थे—पाययते to swallow), Aor—अपीप्यत् ॥ Des—पिपासति ॥ Fre—पेपीयते ॥ Kṛi—पातव्यः, पानीयः, पेयः ॥ PP—पीतः ॥ IP—पीत्वा, प्र + पा = प्रपाय ॥ Inf—पातुम् ॥

पा—अदा P. to protect. Pre—पाति ॥ Pot—पायात् ॥ Imp—पातु, पाहि ॥ Impf—अपात् ॥ Perf—पपौ ॥ Aor—अपासीत् ॥ Fu—पास्यति ॥ Per Fu—पाता ॥ Con—अपास्यत् ॥ Ben—पायात् ॥ Pas—पायते, Aor—अपायि ॥ Cau—पालयति, Aor—अपीपलत् ॥ Des—पिपासति ॥ PP—पातः ॥ Inf—पातुम् ॥

पाल्—चुरा U. to protect. Pre—पालयति or ते ॥ Pot—पालयेत् or त ॥ Imp—पालयतु or ताम् ॥ Impf—अपालयत् or त ॥ Perf—पालयां चकार or चक्रे ॥ Aor—अपीपलत् or त ॥ Fu—पालयिष्यति or ते ॥ Per Fu—पालयिता ॥ Con—अपालयिष्यत् or त ॥ Ben—पाल्यात् or पालयिषीष्ट ॥ Pas—पाल्यते, Aor—अपालि ॥ PP—पालितः ॥ IP—पालयित्वा ॥ Inf—पालयितुम् ॥

पिष् (पिष्लृ)—रुधा P. to grind, to hurt. Pre—पिनष्मि, पिंष्वः, पिंष्मः ; पिनक्षि, पिंष्ठः, पिंष्ठ ; पिनष्टि, पिंष्टः, पिंषन्ति ॥ Pot—पिंष्याम्, पिंष्याः, पिंष्यात् (पिंष्याताम् 3rd Du) ॥ Imp—पिनषाणि, पिण्ड्ढि, पिनष्टु (पिंष्टाम् 3rd Du) ॥ Impf—अपिनषम्, अपिंष्व ; अपिनट्, अपिंष्टम् ; अपिनट्, अपिंष्टाम् ॥ Perf—पिपेष, पिपिषिव ; पिपेषिथ, पिपिषथुः ; पिपेष, पिपिषतुः ॥ Aor—अपिषम्, अपिषः, अपिषत् ॥ Fu—पेक्ष्यति ॥ Per Fu—पेष्टा ॥ Con—अपेक्ष्यत् ॥ Ben—पिष्यात् ॥ Pas—पिष्यते, Aor—अपेषि ॥ Cau—पेषयति, Aor—अपीपिषत् ॥ Des—पिपिक्षति ॥ Fre—पेपिष्यते ॥ PP—पिष्टः ॥ IP—पिष्ट्वा ॥ Inf—पेष्टुम् ॥

पीड्—चुरा U. to press, to hurt. Pre—पीडयति or ते ॥ Pot—पीडयेत् or त ॥ Imp—पीडयतु or पीडयताम् ॥ Impf—अपीडयत् or त ॥ Perf—पीडयांचकार or चक्रे ॥ Aor—अपीपिडयत् or त or अपिपीडयत् or त ॥ Fu—पीडयिष्यति or ते ॥ Per Fu—पीडयिता ॥ Con—अपीडयिष्यत् or त ॥ Ben—पीड्यात् or पीडयिषीष्ट ॥ Pas—पीड्यते, Aor—अपीडि ॥ Des—पिपीडयिषति or ते ॥ PP—पीडितः ॥ IP—पीडयित्वा ॥ Inf—पीडयितुम् ॥

पुष्—भ्वा P. to nourish, to develop. Pre—पोषति ॥ Pot—पोषेत् ॥ Imp—पोषतु ॥ Impf—अपोषत् ॥

Perf—पुपोष, पुपुषिव ; पुपोषिथ, पुपुषथुः ; पुपोष, पुपुषतुः ॥ Aor—अपोषिषम्, अपोषीः, अपोषीत् ॥ Fu—पोषिष्यति ॥ Per Fu—पोषिता ॥ Con—अपोषिष्यत् ॥ Ben – पुष्यात् ॥ Pas—पुष्यते, Aor—अपोषि॥ Cau—पोषयति, Aor—अपूपुषत् ॥ Des—पुपुषिषति or पुपोषिषति ॥ Fre—पोपुष्यते ॥ Kṛi—पोषणीयः ॥ PP—पुषितः ॥ IP—पुषित्वा ॥ Inf—पोषितुम् ॥

पुष्—दिवा P. to nourish, to develop. Pre—पुष्यति ॥ Pot—पुष्येत् ॥ Imp—पुष्यतु ॥ Impf—अपुष्यत् ॥ Perf—पुपोष, पुपोषिथ, पुपोष ॥ Aor—अपुषम्, अपुषः, अपुषत् ॥ Fu—पोक्ष्यति ॥ Per Fu—पोष्टा ॥ Con—अपोक्ष्यत् ॥ Ben—पुष्यात् ॥ Pas—पुष्यते, Aor—अपोषि ॥ Cau—पोषयति, Aor—अपूपुषत् ॥ Des—पुपुक्षति ॥ Fre—पोपुष्यते ॥ PP—पुष्टः ॥

पुष्—क्र्या P. to nourish. Pre—पुष्णामि, पुष्णीवः, पुष्णीमः ; पुष्णासि, पुष्णीथः, पुष्णीथ ; पुष्णाति, पुष्णीतः, पुष्णन्ति ॥ Pot—पुष्णीयाम्, पुष्णीयाः, पुष्णीयात् (पुष्णीयाताम्, पुष्णीयुः 3rd Du, and Plu) ॥ Imp—पुष्णानि, पुषाण, पुष्णातु (पुष्णीताम्, पुष्णन्तु 3rd Du, and Plu) ॥ Impf—अपुष्णाम्, (1st Du, Plu) अपुष्णीव, अपुष्णीम ; अपुष्णाः, अपुष्णात् (अपुष्णीताम्, अपुष्णन् 3rd Du, and

Plu) ॥ Perf—पुपोष, पुपुषिव, पुपुषिम ; पुपोषिथ, पुपुषथुः, पुपुष ; पुपोष, पुपुषतुः, पुपुषुः ॥ Aor—अपोषीत् like पोषति ॥

पुष्—चुरा U. to promote, to maintain (धारणार्थे). Pre—पोषयति or ते ॥ Perf—पोषयां चकार or चक्रे ॥ Aor—अपूपुषत् ॥ पोषयत्याभरणम् ॥

पुष्प्—दिवा P. to open, to blow. Pre—पुष्प्यति ॥ Pot—पुष्प्येत् ॥ Imp—पुष्प्यतु ॥ Impf—अपुष्प्यत् ॥ Perf—पुपुष्प, (पुपुष्पिव 1st Du); पुपुष्पिथ, पुपुष्प ॥ Aor—अपुष्पीत् ॥ Fu—पुष्पिष्यति ॥ Per Fu—पुष्पिता ॥ Ben—पुष्प्यात् ॥ Pas—पुष्प्यते, Aor—अपुष्पि ॥ Cau—पुष्पयति, Aor—अपुपुष्पत् ॥ Des—पुपुष्पिषति ॥ Fre—पोपुष्प्यते ॥ PP—पुष्पितः ॥ IP—पुष्पित्वा ॥ Inf—पुष्पितुम् ॥

पू (पूङ्)—भ्वा A. to purify, to winnow, to invent. Pre—पवते ॥ Pot—पवेत ॥ Imp—पवताम् ॥ Impf—अपवत ॥ Perf—पुपुवे, पुपुविषे ॥ Aor—अपविष्ट ॥ Fu—पविष्यते ॥ Per Fu—पविता ॥ Ben—पविषीष्ट ॥ Pas—पूयते, Aor—अपावि ॥ Cau—पावयति, Aor—अपीपवत् ॥ Des—पिपविषते ॥ Fre—पोपूयते ॥ PP—पूतः or पवितः ॥ IP—पूत्वा or पवित्वा ॥ Inf—पवितुम् ॥

पू (पूञ्)—क्र्या U. to purify. Pre—पुनामि or पुने ;

पुनासि or पुनीषे ; पुनाति or पुनीते ॥ Pot—पुनीयाम् or पुनीय ; पुनीयाः or पुनीथाः ; पुनीयात् or पुनीत ॥ Imp—पुनानि or पुनै ; पुनीहि or पुनीष्व ; पुनातु or पुनीताम् ॥ Impf—अपुनाम् or अपुनि, अपुनीव or अपुनीवहि ; अपुनाः or अपुनीथाः, अपुनीतम् or अपुनाथाम् ; अपुनात् or अपुनीत, अपुनीताम् or अपुनाताम् ॥ Perf—पुपाव or पुपुवे (पुपुविव or पुपुविवहे 1st Du) ; पुपविथ or पुपुविषे ; पुपाव or पुपुवे (पुपुवुः or पुपुविरे 3rd Plu) ॥ Aor—अपावीत् or अपविष्ट (अपाविष्टाम् or अपविषाताम्, अपाविषुः or अपविषत 3rd Du, and Plu) ॥ Fu—पविष्यति or पविष्यते ॥ Ben—पूयात् or पविषीष्ट ॥ Cau—like पूङ् ॥ Des—पुपूषति or ते ॥ Fre—like पूङ् ॥ PP—पूतः (विनाशार्थे—पूनः) ॥ IP—पूत्वा ॥ Inf—पवितुम् ॥

पूज्—चुरा U. to adore, to receive with honour, to present with. Pre—पूजयति or ते ॥ Perf—पूजयां चकार or चक्रे ॥ Aor—अपूपुजत् or त ॥ Fu—पूजयिष्यति or ते ॥ PP—पूजितः ॥ IP—पूजयित्वा ॥ Inf—पूजयितुम् ॥

पूर् (पूरी)—दिवा A. to satisfy. Pre—पूर्यते ॥ Perf—पुपूरे ॥ Aor—अपूरिष्ट or अपूरि ॥ Per Fu—पूरिता ॥ Ben—पूरिषीष्ट ॥ Pas—पूर्यते, Aor—अपूरि ॥ Cau—पूरयति, Aor—अपूपुरत् ॥ Des—

पुपूरिषते ॥ Fre—पोपूर्यते ॥ PP—पूर्णः ॥ Inf—पूरितुम् ॥

पूर् (पूरी)—चुरा U. to fill, to blow. Pre—पूरयति or ते ॥ Perf—पूरयां चकार or चक्रे ॥ Aor—अपूपुरत् or त ॥ PP—पूरितः ॥ IP—पूरयित्वा ॥ Inf—पूरयितुम् ॥

पृ (पृङ्)—तुदा A. to be busy, to be active, (mostly used with व्या). Pre—व्याप्रियते ॥ Pot—व्याप्रियेत ॥ Imp—व्याप्रियताम् ॥ Impf—व्याप्रियत ॥ Perf—व्यापप्रे, व्यापप्रिषे, व्यापप्रे (व्यापप्राते, व्यापप्रिरे 3rd Du, and Plu) ॥ Aor—व्यापृषि, व्यापृथाः, व्यापृत (व्यापृषाताम्, व्यापृषत 3rd Du, and Plu) ॥ Fu—व्यापरिष्यते ॥ Per Fu—व्यापर्ता ॥ Con—व्यापरिष्यत ॥ Ben—व्यापृषीष्ट ॥ Pas—व्याप्रियते ॥ Cau—व्यापारयति, Aor—व्यापीपरत् ॥ Des—व्यापुपूर्षते ॥ Fre—व्यापेप्रियते ॥ PP—व्यापृत ॥ IP—व्यापृत्य ॥ Inf—व्यापर्तुम् ॥

पृ—स्वा P. to be satisfied. प्रीत्यर्थे. Pre—पृणोति ॥ Pot—पृणुयात् ॥ Imp—पृणोतु ॥ Impf—अपृणोत् ॥ Perf—पपार, पप्रिव ; पपर्थ, पप्रथुः ; पपार, पप्रतुः ॥ Aor—अपार्षीत् ॥ Fu—परिष्यति ॥ Per Fu—पर्ता ॥ Con—अपरिष्यत् ॥ Ben—प्रियात् ॥ Pas—प्रियते ॥ Cau—पारयति, Aor—अपीपरत् ॥ Des—पुपूर्षति ॥ Fre—

पेप्रीयते ॥ PP—पृतः ॥ IP—पृत्वा ॥ Inf—पर्तुम् ॥

पॄ—क्र्या P. to fill, to guard. Pre—पृणाति ॥ Pot—पृणीयात् ॥ Imp—पृणाति, पृणीहि, पृणातु ॥ Impf—अपृणात् ॥ Perf—पपर or पपार, पपरिव or पप्रिव, पपरिम or पप्रिम ; पपरिथ, पपरथुः or पप्रथुः, पपर ; पपार, पपरतुः or पप्रतुः, पपरुः or पप्रुः ॥ Aor—अपारीत् (अपारिष्टाम् 3rd Du) ॥ Fu—परिष्यति or परीष्यति ॥ Pre Fu—परिता or परीता ॥ Con—अपरिष्यत् or अपरीष्यत् ॥ Ben—पूर्यात् ॥ Pas—पूर्यते ॥ Cau—पारयति, Aor—अपीपरत् ॥ Des—पिपरिषति or पिपरीषति or पिपूर्षति ॥ Fre—पोपूर्यते ॥ PP—पूर्त्तः ॥ IP—पूर्त्वा ॥ Inf—पूर्तुम् ॥

पॄ—जुहो P. to fill, to guard. Per—पिपर्मि, पिपूर्वः, पिपूर्मः ; पिपर्षि, पिपूर्थ', पिपूर्थ ; पिपर्ति, पिपूर्तः, पिपूरति ॥ Pot – पिपूर्याम्, पिपूर्याः, पिपूर्यात् (पिपूर्याताम् 3rd Du) ॥ Imp—पिपराणि, पिपूर्हि, पिपर्तु (पिपूर्ताम् 3rd Du) ॥ Impf—अपिपरम्, अपिपूर्व, अपिपूर्म ; अपिपः, अपिपूर्तम, अपिपूर्त ; अपिपः, अपिपूर्ताम्, अपिपरुः ॥ Perf—पपार or पपर, पप्रिव or पपरिव ; पप्रिम or पपरिम ; Like—पृणाति ॥

पॄ—चुरा U. to fill. Pre—पारयति ॥ Etc.

प्याय् (ओप्यायी)—भ्वा A. to grow, to swell, to increase Pre—प्यायते ॥ Pot—प्यायेत ॥ Imp—प्यायताम् ॥ Impf—अप्यायत ॥ Perf—पिप्ये, पिप्यिवहे, पिप्यिमहे ; पिप्यिषे, पिप्याथे, पिप्यिध्वे ; पिप्ये, पिप्याते, पिप्यिरे ॥ Aor—अप्यायि or अप्यायिष्ट ॥ Fu—प्यायिष्यते ॥ Per Fu—प्यायिता ॥ Con—अप्यायिष्यत ॥ Ben—प्यायिषीष्ट ॥ Pas—प्यायते, Aor—अप्यायि ॥ Cau—प्याययति, Aor—अपिप्ययत् ॥ Des—पिप्यायिषते ॥ Fre—पेपीयते ॥ PP—प्यानः or पीनः, स्वाङ्गे—पीनम्, उपसर्गान्न—प्रप्यानः, आपूर्वात्—आपीनः अन्धुः, आपीनमूधः ॥ IP—प्यायित्वा ॥ Inf—प्यायितुम् ॥

प्रच्छ्—तुदा P. to ask. Pre—पृच्छामि, पृच्छसि, पृच्छति ॥ Pot—पृच्छेयम्, पृच्छेः, पृच्छेत् ॥ Imp—पृच्छानि, पृच्छ, पृच्छतु ॥ Impf—अपृच्छम्, अपृच्छः, अपृच्छत् ॥ Perf—पप्रच्छ, पप्रच्छिव, पप्रच्छिम ; पप्रच्छिथ or पप्रष्ठ ; पप्रच्छ ॥ Aor—अप्राक्षम्, अप्राक्ष्व, अप्राक्ष्म ; अप्राक्षीः, अप्राष्टम्, अप्राष्ट ; अप्राक्षीत्, अप्राष्टाम्, अप्राक्षुः ॥ Fu—प्रक्ष्यामि, प्रक्ष्यावः, प्रक्ष्यसि, प्रक्ष्यथः ; प्रक्ष्यति, प्रक्ष्यतः ॥ Per Fu—प्रष्टास्मि, प्रष्टासि, प्रष्टा ॥ Con—अप्रक्ष्यम्, अप्रक्ष्यः, अप्रक्ष्यत् ॥ Ben—पृच्छ्यासम्, पृच्छ्याः, पृच्छ्यात् ॥ Pas—पृच्छ्यते ॥ Cau—प्रच्छयति, Aor—अपप्रच्छत् ॥ Des—

पिपृच्छिषति ॥ Fre—परीपृच्छ्यते ॥ Kṛi—प्रष्टव्यः ॥ PP—पृष्टः ॥ IP—पृष्ट्वा ॥ Inf—प्रष्टुम् ॥

प्रथ्—भ्वा A. to become famous, to increase, to rise. Pre–प्रथते ॥ Pot—प्रथेत ॥ Imp—प्रथतु ॥ Impf—अप्रथत ॥ Perf—पप्रथे ॥ Aor—अप्रथिष्ट ॥ Fu—प्रथिष्यते ॥ Per Fu—प्रथिता ॥ Con—अप्रथिष्यत ॥ Ben--प्रथिषीष्ट ॥ Pas—प्रथ्यते, Aor—अप्राथि ॥ Cau—प्रथयति, Aor—अपप्रथत् ॥ Des—पिप्रथिषते ॥ PP—प्रथितः ॥ IP—प्रथित्वा ॥ Inf—प्रथितुम् ॥

प्रथ्—चुरा U. to become famous. Pre—प्राथयति or ते ॥ Perf—प्राथयां चकार or चक्रे ॥ Aor—अपप्रथत् ॥ Per Fu—प्राथयिता ॥ etc.

प्री (प्रीङ्)—दिवा A to be satisfied, to fill affection. Pre—प्रीयते ॥ Pot—प्रीयेत ॥ Imp—प्रीयताम् ॥ Impf—अप्रीयत ॥ Perf—पिप्रिये ॥ Aor—अप्रेष्ट ॥ Fu—प्रेष्यते ॥ Per Fu—प्रेता ॥ Con—अप्रेष्यत ॥ Ben—प्रेषीष्ट ॥ Pas—प्रीयते (भावे) ॥ Cau—प्राययति, Aor—अपिप्रयत् ॥ Des—पिप्रीषते ॥ Fre—पेप्रीयते ॥ PP—प्रीतः ॥ IP—प्रीत्वा ॥ Inf—प्रेतुम् ॥

प्री (प्रीञ्)—क्र्या U. to please, to take delight in.
Pre—

प्रीणामि	प्रीणीवः	प्रीणीमः
or	or	or
प्रीणे	प्रीणीवहे	प्रीणीमहे
प्रीणासि	प्रीणीथः	प्रीणीथ
or	or	or
प्रीणीषे	प्रीणाथे	प्रीणीध्वे
प्रीणाति	प्रीणीतः	प्रीणन्ति
or	or	or
प्रीणीते	प्रीणाते	प्रीणते

Pot—प्रीणीयाम् or प्रीणीय, प्रीणायाव or प्रीणीवहि ; प्रीणीयाः or प्रीणीथाः, प्रीणीयातम् or प्रीणीयाथाम् , प्रीणीयात् or प्रीणीत, प्रीणीताम् or प्रीणीयाताम् (प्रीणीयुः or प्रीणीरन् 3rd Plu) ॥ Imp—प्रीणानि or प्रीणै ; प्रीणीहि or प्रीणीष्व ; प्रीणातु or प्रीणीताम् ॥ Impf—अप्रीणाम् or अप्रीणि ; अप्रीणाः or अप्रीणीथाः ; अप्रीणात् or अप्रीणीत ॥ Perf—पिप्राय or पिप्रय or पिप्रिये, पिप्रियिव or पिप्रियिवहे ; पिप्रियिथ or पिप्रेथ or पिप्रियिषे, पिप्रियथुः or पिप्रियाथे ; पिप्राय or पिप्रिये, पिप्रियतुः or पिप्रियाते ॥ Aor—अप्रैषम् or अप्रषि ; अप्रैषीः or अप्रैष्ठाः ; अप्रैषीत् or अप्रैष्ट ॥ Fu—प्रेष्यति or प्रेष्यते ॥ Per Fu—प्रेता ॥ Con—अप्रेष्यत् or अप्रेष्यत ॥ Ben—प्रीयात् or प्रेषीष्ट ॥ Pas—प्रीयते ॥ Cau—प्रीणयति, Aor—अपिप्रीणत् ॥ Des—पिप्रीषति or ते ॥ Fre—पेप्रीयते ॥ PP—प्रीतः IP—प्रीत्वा ॥ Inf—प्रेतुम् ॥

प्लु (प्लुङ्)—भ्वा A. to float, to fly, to jump. Pre—प्लवते ॥ Pot—प्लवेत ॥ Imp—प्लवताम् ॥ Impf—अप्लवत ॥ Perf—पुप्लुवे ॥ Aor—अप्लोष्ट ॥ Fu—प्लोष्यते ॥ Per Fu—प्लोता ॥ Con—अप्लोष्यत ॥ Ben—प्लोषीष्ट ॥ Pas—प्लूयते, Aor—अप्लावि ॥ Cau—प्लावयति, Aor—अपुप्लवत् ॥ Des—पुप्लोषते ॥ Fre—पोप्लूयते ॥ PP—प्लुतः ॥ IP—प्लुत्वा ॥ Inf—प्लोतुम् ॥

फ.

फल् (ञिफला)—भ्वा P. to burst. Pre—फलति ॥ Pot—फलेत् ॥ Imp—फलतु ॥ Impf—अफलत् ॥ Perf—पफाल or पफल, फेलिव ; फेलिथ, फेलथुः ; पफाल, फेलतुः ॥ Aor—अफालीत् ॥ Fu—फलिष्यति ॥ Fu—फलिता ॥ Con—अफलिष्यत् ॥ Ben—फल्यात् ॥ Pas—फल्यते, Aor—अफालि ॥ Cau—फालयति, Aor—अपीफलत् ॥ Des—पिफलिषति ॥ Fre—पंफुल्यते ॥ PP—फुल्लः, उत् + फल = उत्फुल्लः, सम् + फल = संफुल्लः, अन्योपसर्गपूर्वकान्नभवति—प्र + फल = प्रफुल्तः ॥ IP—फलित्वा ॥ Inf—फलितुम् ॥

शतधास्य फलेत् मूर्धा ॥ हृदयं मे फलति सहस्रधा ॥

फल्—भ्वा P. to go, to result, to be successful. Pre—फलति ॥ Like फल् (ञिफला), but—PP—फलितः ॥

फलन्ति न पथ्यानि विषद्रुमाः ॥ तस्य विद्या फलिष्यति ॥ फलितम् अस्माकं कपटप्रबन्धेन ॥

फुल्ल्—भ्वा P. to open, to blow. Pre—फुल्लति ॥
प्रफुल्लम्—फुल्लधातोः अच्प्रत्ययः ॥
लोध्रद्रुमं सानुमतः प्रफुल्लम् ॥

ब.

बध—भ्वा A. to loathe चित्तविकारार्थे नित्यसनन्तोऽयम्. Pre—बीभत्सते ॥ Perf—बीभत्सां चक्रे or बभूव or आस ॥ Aor—अबीभत्सिष्ट ॥ Fu—बीभत्सिष्यते ॥ Per Fu – बीभत्सिता ॥ Con—अबीभत्सिष्यत ॥ Ben—बीभत्सिषीष्ट ॥ Pas—बीभत्स्यते ॥ PP—बीभत्सितः ॥ Inf—बीभत्सितुम् ॥

बन्ध्—क्र्या P. to bind. Pre—बध्नामि, बध्नासि, बध्नाति (बध्नीतः 3rd Du) ॥ Pot – बध्नीयाम्, बध्नीयाः, बध्नीयात् ॥ Imp – बध्नानि, बध्नाव ; बधान, बध्नीतम् ; बध्नातु, बध्नीताम् ॥ Impf – अबध्नाम्, अबध्नीव ; अबध्नाः, अबध्नीतम् ; अबध्नात्, अबध्नीताम् ॥ Perf—बबन्ध, बबन्धिव ; बबन्धिथ or बबन्ध, बबन्धथुः ; बबन्ध, बबन्धतुः ॥ Aor – अभान्त्सम्, अभान्त्स्व, अभान्त्स्म ; अभान्त्सीः, अबान्द्धम्, अबन्द्ध , अभान्त्सीत्, अबान्द्धाम्, अभान्त्सुः ॥ Fu – भन्त्स्यति ॥ Per Fu – बन्द्धा ॥ Con – अभन्त्स्यत् ॥ Ben – बध्यात् ॥ Pas – बध्यते, Aor—अबन्धि ॥ Cau—बन्धयति, Aor—

अबबन्धत् ॥ Des—बिभन्त्सति ॥ Fre—बाबध्यते ॥ PP—बद्धः ॥ IP—बद्धा ॥ Inf—बन्धुम् ॥

बाध्—भ्वा A. to oppress, to torment. Pre—बाधते ॥ Pot—बाधेत ॥ Imp—बाधताम् ॥ Impf—अबाधत ॥ Perf—बबाधे ॥ Aor—अबाधिषि, अबाधिष्ठाः, अबाधिष्ट ॥ Fu—बाधिष्यते ॥ Per Fu—बाधिता ॥ Con—अबाधिष्यत ॥ Ben—बाधिषीष्ट ॥ Pas—बाध्यते, Aor—अबाधि ॥ Cau—बाधयति or ते, Aor—अबबाधत् or त ॥ Des—बिबाधिषते ॥ Fre—बाबाध्यते ॥ Kṛi—बातितव्यः, बाधनीयः ॥ PP—बाधितः ॥ IP—बाधित्वा ॥ Inf—बाधितुम् ॥

बुध्—भ्वा P. to know, to perceive. Pre—बोधति ॥ Pot—बोधेत् ॥ Imp—बोधतु ॥ Impf—अबोधत् ॥ Per—बुबोध ॥ Aor—अबोधीत् ॥ Fu—बोधिष्यति ॥ Per Fu—बोधिता ॥ Con—अबोधिष्यत् ॥ Ben—बुध्यात् ॥ Pas—बुध्यते, Aor—अबोधि ॥ Cau—बोधयति, Aor—अबूबुधत् ॥ Des—बुबोधिषति or बुबुधिषति ॥ Fre—बोबुध्यते ॥ Kṛi—बोधितव्यः, बोधनीयः, बोध्यः ॥ PP—बोधितः or बुधितः ॥ IP—बोधित्वा or बुधित्वा ॥ Inf—बोधितुम् ॥

बुध् (बुधिर्)—भ्वा U. to know. Pre—बोधति or बोधते ॥ Pot—बोधेत् or बोधेत ॥ Imp—

बोधतु or बोधताम् ॥ Impf—अबोधत् or अबोधत ॥ Perf—बुबोध or बुबुधे ॥ Aor—अबुधत् or अबोधीत् or अबोधिष्ट ॥ Fu—बोधिष्यति or ते ॥ Per Fu—बोधिता ॥ Con—अबोधिष्यत् or त ॥ Ben—बुध्यात् or बोधिषीष्ट ॥ Pas—बुध्यते, Aor—अबोधि ॥ Cau—बोधयति or ते, Aor—अबूबुधत् or त ॥ Des—बुबोधिषति or ते or बुबुधिषति or ते ॥ Fre—बोबुध्यते ॥ Kṛi—PP—IP and Inf—like बुध् ॥

बुध्—दिवा A. to know, to perceive, to understand.
Pre—बुध्यते ॥ Pot—बुध्येत ॥ Imp—बुध्यताम् ॥ Impf—अबुध्यत ॥ Perf—बुबुधे ॥ Aor—अभुत्सि, अभुत्स्वहि, अभुत्स्महि ; अबुद्धाः, अभुत्साथाम्, अभुद्ध्वम् ; अबोधि or अबुद्ध, अभुत्साताम्, अभुत्सत ॥ Fu—भोत्स्यते ॥ Per Fu—बोद्धा ॥ Con—अभोत्स्यत ॥ Ben—भुत्सीष्ट ॥ Pas—बुध्यते, Aor—अबोधि ॥ Cau—बोधयति (अस्य ण्यन्तात्परस्मैपदमेव), Aor—अबूबुधत् ॥ Des—बुभुत्सते ॥ Fre—बोबुध्यते ॥ Kṛi—बोद्धव्यः ॥ PP—बुद्धः ॥ IP—बुद्ध्वा ॥ Inf—बोद्धुम् ॥

ब्रू (ब्रूञ्)—अदा U. to speak.
Pre—

PARASMAIPADA.

ब्रवीमि ब्रूवः ब्रूमः

ब्रवीषि	ब्रूथः	ब्रूथ
or	or	
आत्थ	आहथुः	
ब्रवीति	ब्रूतः	ब्रुवन्ति
or	or	or
आह	आहतुः	आहुः

ATMANEPADA.

ब्रुवे	ब्रूवहे	ब्रूमहे
ब्रूषे	ब्रुवाथे	ब्रूध्वे
ब्रूते	ब्रुवाते	ब्रुवते

Pot—ब्रूयाम् or ब्रुवीय, ब्रूयाव or ब्रुवीवहि ; ब्रूयाः or ब्रुवीथाः, ब्रूयातम् or ब्रुवीयाथाम् ; ब्रूयात् or ब्रुवीत, ब्रूयाताम् or ब्रुवीयाताम् ॥ Imp—ब्रवाणि or ब्रवै, ब्रवाव or ब्रवावहै, ब्रवाम or ब्रवामहै ; ब्रूहि or ब्रूष्व, ब्रूतम् or ब्रुवाथाम्, ब्रूत or ब्रूध्वम् ; ब्रवीतु or ब्रूताम्, ब्रूताम् or ब्रुवाताम्, ब्रुवन्तु or ब्रुवताम् ॥ Impf—अब्रुवम् or अब्रुवि, अब्रवीः or अब्रूथाः, अब्रवीत् or अब्रूत ॥

Perf—

PARASMAIPADA.

उवाच or उवच	ऊचिव	ऊचिम
उवचिथ or उवक्थ	ऊचथुः	ऊच
उवाच	ऊचतुः	ऊचुः

ATMANEPADA.

ऊचे	ऊचिवहे	ऊचिमहे
ऊचिषे	ऊचाथे	ऊचिध्वे
ऊचे	ऊचाते	ऊचिरे

Aor—

PARASMAIPADA.

अवोचम्	अवोचाव	अवोचाम
अवोचः	अवोचतम्	अवोचत
अवोचत्	अवोचताम्	अवोचन्

ATMANEPADA.

अवोचे	अवोचावहि	अवोचामहि
अवोचथाः	अवोचेथाम्	अवोचध्वम्
अवोचत	अवोचेताम्	अवोचन्त

Fu—वक्ष्यति or वक्ष्यते ॥ Per Fu—वक्तास्मि or वक्ताहे ; वक्तासि or वक्तासे ; वक्ता ॥ Con—अवक्ष्यत् or अवक्ष्यत ॥ Ben—उच्यासम् or वक्षीय ; उच्याः or वक्षीष्ठाः ; उच्यात् or वक्षीष्ट ॥ Pas—उच्यते, Aor—अवाचि ॥ Cau—वाचयति or ते, Aor—अवीवचत् or त ॥ Des—विवक्षति or विवक्षते ॥ Fre—वावच्यते ॥ Kṛi—वक्तव्यः, प्रवचनीयः ॥ PP—उक्तः ॥ IP—उक्त्वा ॥ Inf—वक्तुम् ॥

भ.

भक्ष्—चुरा U. to eat. Pre—भक्षयति or ते ॥ Pot—भक्षयेत् or त ॥ Imp—भक्षयतु or भक्षयताम् ॥ Impf—अभक्षयत् or त ॥ Perf—भक्षयां चकार or चक्रे or आस or बभूव ॥ Aor—अबभक्षत् or त ॥ Fu—भक्षयिष्यति or ते ॥ Per Fu—भक्षयिता ॥ Con—अभक्षयिष्यत् or त ॥ Ben—भक्ष्यात् or भक्षयिषीष्ट ॥ Pas—भक्ष्यते, Aor—अभक्षि ॥ Cau—भक्षयति (भक्षयति पिण्डीं देवदत्तः, भक्षयति पिण्डीं देवदत्तेन) ॥ Des—बिभक्षयिषति or ते ॥ Kṛi—भक्षयितव्यः, भक्षणीयः ॥ PP—भक्षितः ॥ IP—भक्षयित्वा ॥ Inf—भक्षयितुम् ॥

भक्षति or भक्षते इत्यपि ॥

भज्—भ्वा U. to honour, to share. Pre—भजति or भजते ॥ Pot—भजेत् or भजेत ॥ Imp—भजतु or भजताम् ॥ Impf—अभजत् or त ॥ Perf—बभाज or भेजे, भेजिव or भेजिवहे, भेजिम or भेजिमहे ; भेजिथ or बभक्थ, or भेजिषे, भेजथुः or भेजाथे, भेज or भेजिध्वे ; बभाज or भेजे, भेजतुः or भेजाते, भेजुः or भेजिरे ॥ Fu—भक्ष्यति or भक्ष्यते ॥ Per Fu—भक्ता ॥ Con—अभक्ष्यत् or त ॥ Ben—भज्यात् or भक्षीष्ट ॥ Pas—भज्यते, Aor—अभाजि ॥ Cau—भाजयति or ते, Aor—अबीभजत् or त ॥ Des—बिभक्षति or ते ॥ Fre—बाभज्यते ॥ Kṛi—

वि+भक्तव्यः, वि+भज्यः ॥ PP—भक्तः, वि+भक्तः ॥ IP—भक्त्वा ॥ Inf—भक्तुम्, वि+भक्तुम् ॥

भञ्ज् (भञ्जो)—रुधा P. to break, to disappoint. Pre—भनज्मि, भञ्ज्वः, भञ्ज्मः ; भनक्षि, भङ्क्थः, भङ्क्थ ; भनक्ति, भङ्क्तः, भञ्जन्ति ॥ Pot—भञ्ज्यात् ॥ Imp—भनजानि, भङ्ग्धि, भनक्तु ॥ Impf—अभनजम्, अभनक्, अभनक् (अभङ्क्ताम्, अभञ्जन् 3rd Du, Plu) ॥ Perf—बभञ्ज, बभञ्जिव ; बभञ्जिथ or बभङ्क्थ, बभञ्जथुः, बभञ्ज, बभञ्जतुः ॥ Aor—अभाङ्क्षीत् (अभाङ्क्ताम् 3rd Du) ॥ Fu—भङ्क्ष्यति ॥ Per Fre—भङ्क्ता ॥ Con—अभङ्क्ष्यत् ॥ Ben—भज्यात् ॥ Pas—भज्यते, Aor—अभञ्जि or अभजि ॥ Cau—भञ्जयति, Aor—अबभञ्जत् ॥ Des—बिभङ्क्षति ॥ Fre—बम्भज्यते ॥ PP—भग्नः ॥ IP—भङ्क्त्वा or भक्त्वा ॥ Inf—भङ्क्तुम् ॥

भण्—भ्वा P. to speak. Pre—भणति ॥ Perf—बभाण ॥ Aor—अभणीत् or अभाणीत् ॥ Fu—भणिष्यति ॥ Per Fu—भणिता ॥ Pas—भण्यते, Aor—अभाणि ॥ Cau—भाणयति, Aor—अबीभणत् ॥ Des—बिभणिषति ॥ Fre—बम्भण्यते ॥ PP—भणितः ॥ IP—भणित्वा ॥ Inf—भणितुम् ॥

भर्त्स्—चुरा A. to abuse, to deride, to threaten. Pre—भर्त्सयते ॥ Perf—भर्त्सयां चक्रे or आस or बभूव ॥ Aor—अबभर्त्सत ॥ Fu—भर्त्सयिष्यते ॥

Ben—भर्त्संयिषीष्ट ॥ Pas—भर्त्स्यते, Aor—अभर्त्सि ॥ Des—बिभर्त्सिषते ॥ PP—भर्त्सितः ॥ IP—भर्त्सित्वा ॥ Inf—भर्त्सितुम् ॥

भा—अदा P. to shine, to appear. Pre—भाति ॥ Pot—भायात् ॥ Imp—भातु ॥ Impf—अभात् (अभाताम्, अभुः or अभान् 3rd Du, Plu) ॥ Perf—बभौ, बभिव, बभिम ; बभिथ or बभाथ, बभथुः, बभ ; बभौ, बभतुः, बभुः ॥ Aor—अभासिषम्, अभासीः, अभासीत् ॥ Fu—भास्यति ॥ Per Fu—भाता ॥ Con—अभास्यत् ॥ Ben—भायात् ॥ Pas—भायते, Aor—अभायि ॥ Cau—भापयति, Aor—अबीभपत् ॥ Des—बिभासति ॥ Fre—बाभायते ॥ PP—भातः ॥ Inf—भातुम् ॥

वि + अति + भा = व्यतिभाते ॥

भाष्—भ्वा A. to speak, to say, to call. Pre—भाषते ॥ Perf—बभाषे ॥ Aor—अभाषिष्ट ॥ Fu—भाषिष्यते ॥ Per Fu—भाषिता ॥ Con—अभाषिष्यत ॥ Ben—भाषिषीष्ट ॥ Pas—भाष्यते, Aor—अभाषि ॥ Cau—भाषयति, Aor—अबभाषत् or त or अबीभषत् or त ॥ Des—बिभाषिषते ॥ Fre—बाभाष्यते ॥ Kṛi—भाषितव्यः ॥ PP—भाषितः ॥ IP—भाषित्वा ॥ Inf—भाषितुम् ॥

भास्—भ्वा A. to shine. Pre—भासते ॥ Cau—भासयति, Aor—अबीभसत् or अबभासत् ॥

भिक्ष्—भ्वा A. to beg, to obtain. Pre—भिक्षते ॥ Pot—भिक्षेत ॥ Imp—भिक्षताम् ॥ Impf—अभिक्षत ॥ Perf—बिभिक्षे ॥ Aor—अभिक्षिष्ट ॥ Fu—भिक्षिष्यते ॥ Per Fu—भिक्षिता ॥ Con—अभिक्षिष्यत ॥ Ben—भिक्षिषीष्ट ॥ Pas—भिक्ष्यते, Aor—अभिक्षि ॥ Cau—भिक्षयति, Aor—अबिभिक्षत् ॥ Des—बिभिक्षिषते ॥ Fre—बेभिक्ष्यते ॥ Kṛi—भिक्षितव्यः ॥ PP—भिक्षितः ॥ IP—भिक्षित्वा ॥ Inf—भिक्षितुम् ॥

बलिं भिक्षते वसुधाम् ॥

भिद्—(भिदिर्)—रुधा U. to separate, to break down.

Pre—

PARASMAIPADA.

भिनद्मि	भिन्द्वः	भिन्द्मः
भिनत्सि	भिन्थः	भिन्थ
भिनत्ति	भिन्तः	भिन्दन्ति

ATMANEPADA.

भिन्दे	भिन्द्वहे	भिन्द्महे
भिन्त्से	भिन्दाथे	भिन्द्ध्वे
भिन्ते	भिन्दाते	भिन्दते

Pot—भिन्द्याम् or भिन्दीय ; भिन्द्याः or भिन्दीथाः ; भिन्द्यात् or भिन्दीत ॥ Imp—भिनदानि or भिनदै ;

भिन्द्दि or भिन्त्स्व ; भिनत्तु or भिन्ताम् ॥ Impf—अभिनदम् or अभिन्दि ; अभिनत् or अभिनः or अभिन्त्थाः ; अभिनत् or अभिन्त ॥ Perf—बिभेद or बिभिदे, बिभिदिव or बिभिदिवहे ; बिभेदिथ or बिभिदिषे ; बिभिदथुः or बिभिदाथे ; बिभेद or बिभिदे, बिभिदतुः or बिभिदाते ॥

Aor—

PARASMAIPADA.

अभैत्सम्	अभैत्स्व	अभैत्स्म
or	or	or
अभिदम्	अभिदाव	अभिदाम
अभैत्सीः	अभैत्तम्	अभैत्त
or	or	or
अभिदः	अभिदतम्	अभिदत
अभैत्सीत्	अभैत्ताम्	अभैत्सुः
or	or	or
अभिदत्	अभिदताम्	अभिदन्

ATMANEPADA.

अभित्सि	अभित्स्वहि	अभित्स्महि
अभित्त्थाः	अभित्साथाम्	अभिद्ध्वम्
अभित्त	अभित्साताम्	अभित्सत

Fu—भेत्स्यामि or भेत्स्ये ; भेत्स्यसि or भेत्स्यसे ; भेत्स्यति or भेत्स्यते ॥ Per Fu—भेत्तास्मि or भेत्ताहे ; भेत्तासि

or भेत्ताসে ; भेत्ता ॥ Con—अभेत्स्यत् or अभेत्स्यत ॥ Ben—भिद्यासम् or भित्सीय ; भिद्याः or भित्सीष्ठाः ; भिद्यात् or भित्सीष्ट ॥ Pas—भिद्यते, Aor—अभेदि ॥ Cau—भेदयति, Aor—अबीभिदत् ॥ Des—बिभित्सति or ते ॥ Fre—बेभिद्यते ॥ Kṛi—भेत्तव्यः, भेदनीयः, भेद्यः ॥ PP—भिन्नः, शकलार्थे—भित्तम् शकलम् ॥ IP—भित्त्वा॥ Inf—भेत्तुम् ॥

भी (ञिभी)—जुहो P. to fear, to be anxious about.

Per—

बिभेमि	बिभिवः or बिभीवः	बिभिमः or बिभीमः
बिभेषि	बिभिथः or बिभीथः	बिभिथ or बिभीथ
बिभेति	बिभितः or बिभीतः	बिभ्यति

Pot—

बिभियाम् or बिभीयाम्	बिभियाव or बिभीयाव	बिभियाम or बिभीयाम

बिभियाः	बिभियातम्	बिभियात
or	or	or
बिभीयाः	बिभीयातम्	बिभीयात
बिभियात्	बिभियाताम्	बिभियुः
or	or	or
बिभीयात्	बिभीयाताम्	बिभीयुः

Imp—

बिभयानि	बिभयाव	बिभयाम
बिभिहि	बिभितम्	बिभित
or	or	or
बिभीहि	बिभीतम्	बिभीत
बिभेतु	बिभिताम्	बिभ्यतु
	or	
	बिभीताम्	

Impf—

अबिभयम्	अबिभिव	अबिभिम
	or	or
	अबिभीव	अबिभीम
अबिभेः	अबिभितम्	अबिभित
	or	or
	अबिभीतम्	अबिभीत
अबिभेत्	अबिभिताम्	अबिभयुः
	or	
	अबिभीताम्	

Perf—

बिभाय or बिभय	बिभ्यिव	बिभ्यिम
बिभयिथ or बिभेथ	बिभ्यथुः	बिभ्य
बिभाय	बिभ्यतुः	बिभ्युः

or बिभयांचकार or आस or बभूव ॥ Fu—भेष्यामि, भेष्यसि, भेष्यति ॥ Per Fu—भेतास्मि, भेतासि, भेता ॥ Con—अभेष्यम्, अभेष्यः, अभेष्यत् ॥ Ben—भीयासम्, भीयाः, भीयात् (भीयास्ताम्, भीयासुः 3rd Du, Plu) ॥ Pas—भीयते, Aor—अभायि ॥ Cau—भापयति or भापयते or भीषयते, Aor—अबीभपत् or अबीभपत or अबीभषत ॥ Des—बिभीषति ॥ Fre—बेभीयते ॥ Kri—भेतव्यः ॥ PP—भीतः ॥ Inf—भेतुम् ॥

चौरात् बिभेति ॥

भुज्—रुध. U. to protect, to eat, to enjoy, to govern.

Pre—

PARASMAIPADA.

भुनज्मि	भुञ्ज्वः	भुञ्ज्मः
भुनक्षि	भुङ्क्थः	भुङ्क्थ
भुनक्ति	भुङ्क्तः	भुञ्जन्ति

ATMANEPADA.

भुञ्जे	भुञ्ज्वहे	भुञ्ज्महे

भुङ्क्षे भुञ्जाथे भुङ्ग्ध्वे
भुङ्क्ते भुञ्जाते भुञ्जते

Pot—भुञ्ज्याम् or भुञ्जीय ; भुञ्ज्याः or भुञ्जीथाः, भुञ्ज्यात् or भुञ्जीत ॥ Imp—भुनजानि or भुनजै ; भुङ्ग्धि or भुङ्क्ष्व (भुङ्क्त or भुङ्ग्ध्वम् 2nd Plu) ; भुनक्तु or भुङ्क्ताम् (भुङ्क्ताम् or भुञ्जताम् ; भुञ्जन्तु or भुञ्जताम् 3rd Du, Plu) ॥Impf—

PARASMAIPADA.

अभुनजम् अभुञ्ज्व अभुञ्ज्म
अभुनक् अभुङ्क्तम् अभुङ्क्त
अभुनक् अभुङ्क्ताम् अभुञ्जन्

ATMANEPADA.

अभुञ्जि अभुञ्ज्वहि अभुञ्ज्महि
अभुङ्क्थाः अभुञ्जाथाम् अभुङ्ग्ध्वम्
अभुङ्क्त अभुञ्जाताम् अभुञ्जत

Perf—बुभोज or बुभुजे, बुभुजिव or बुभुजिवहि ; बुभोजिथ or बुभुजिषे, बुभुजथुः or बुभुजाथे ; बुभोज or बुभुजे, बुभुजतुः or बुभुजाते ॥

Aor—

PARASMAIPADA.

अभौक्षम् अभौक्ष्व अभौक्ष्म
अभौक्षीः अभौक्ताम् अभौक्त
अभौक्षीत् अभौक्ताम् अभौक्षुः

ATMANEPADA.

अभुक्षि	अभुक्ष्वहि	अभुक्ष्महि
अभुक्थाः	अभुक्षाथाम्	अभुग्ध्वम्
अभुक्त	अभुक्षाताम्	अभुक्षत

Fu—भोक्ष्यति or भोक्ष्यते ॥ Per Fu—भोक्ता ॥ Con—अभोक्ष्यत् or अभोक्ष्यत ॥ Ben—भुज्यात् or भुक्षीष्ट ॥ Pas—भुज्यते, Aor—अभोजि ॥ Cau—भोजयति or ते, Aor—अबूभुजत् or त ॥ Des—बुभुक्षति or ते ॥ Fre—बोभुज्यते ॥ Kṛi—भोक्तव्यः ॥ PP—भुक्तः ॥ IP—भुक्त्वा ॥ Inf—भोक्तुम् ॥

बुभुजे पृथिवीपालः पृथिवीमेव केवलाम् ॥
वृद्धो जनो दुःखशतानि भुङ्क्ते ॥

भू—भ्वा P. to be. Pre—

भवामि	भवावः	भवामः
भवसि	भवथः	भवथ
भवति	भवतः	भवन्ति

Pot—

भवेयम्	भवेव	भवेम
भवेः	भवेतम्	भवेत
भवेत्	भवेताम्	भवेयुः

Imp—

भवानि भवाव भवाम
भव भवतम् भवत
भवतु भवताम् भवन्तु

Impf—

अभवम् अभवाव अभवाम
अभवः अभवतम् अभवत
अभवत् अभवताम् अभवन्

Perf—

बभूव बभूविव बभूविम
बभूविथ बभूवथुः बभूव
बभूव बभूवतुः बभूवुः

Aor—

अभूवम् अभूविव अभूविम
अभूः अभूतम् अभूत
अभूत् अभूताम् अभूवन्

Fu—

भविष्यामि भविष्यावः भविष्यामः
भविष्यसि भविष्यथः भविष्यथ
भविष्यति भविष्यतः भविष्यन्ति

Per Fu—

भवितास्मि भवितास्वः भवितास्मः
भवितासि भवितास्थः भवितास्थ
भविता भवितारौ भवितारः

Con—

अभविष्यम् अवविष्याव अभविष्याम
अभविष्यः अभविष्यतम् अभविष्यत
अभविष्यत् अभविष्यताम् अभविष्यन्

Ben—

भूयासम् भूयास्व भूयास्म
भूयाः भूयास्तम् भूयास्त
भूयात् भूयास्ताम् भूयासुः

Pas—(भावे)—अकर्मकधातुभ्यो भावे कर्तरि च लकारा भवन्ति। तत्र भावे प्रथमपुरुषैकवचनमेव ॥ सकर्मकधातुभ्यः कर्मणि कर्त्तरि च लकारा भवन्ति। तत्र कर्मणि एकवचनद्विवचनबहुवचनानि स्युः ॥ लट्—लिङ् (विध्यर्थे)—लोट्—लङ्षु परेषु य (यक्) भावे कर्मणि च ॥ भावे कर्मणि च आत्मनेपदं भवति ॥

Pre—भूयते, देवदत्तेन भूयते or त्वया भूयते or मया भूयते ॥ Pot—भूयेत ॥ Imp—भूयताम् ॥ Impf—अभूयत ॥

Perf—बभूवे ॥ Aor—अभावि ॥ Fu—भाविष्यते or भविष्यते ॥ Per Fu—भाविता or भविता ॥ Con—अभाविष्यत or अभविष्यत ॥ Ben—भाविषीष्ट or भविषीष्ट ॥

भूयते भवता मासम् । अकर्मकधातुभिर्योगे—"कालभावाध्वगन्तव्यदेशवाचकानां कर्मसंज्ञा" ॥

Pas (कर्मणि)—भू—may be used in the कर्मवाच्ये after certain prepositions. Thus—अनु + भू = अनुभूयते, अनुभूयेते, अनुभूयन्ते ; अनुभूयसे, अनुभूयेथे, अनुभूयध्वे ; अनुभूये, अनुभूयावहे, अनुभूयामहे ॥

त्वम् अनुभूयसे ॥ अहम् अनुभूये ॥

Pot—अनुभूयेय, अनुभूयेथाः, अनुभूयेत ॥ Imp—अनुभूये, अनुभूयस्व, अनुभूयताम् ॥ Impf—अन्वभूये, अन्वभूयथाः, अन्वभूयत ॥ Perf—अनुबभूवे, अनुबभूविषे, अनुबभूवे ॥ Aor—अन्वभाविषि or अन्वभविषि ; अन्वभाविष्ठाः or अन्वभविष्ठाः ; अन्वभावि (अन्वभाविषाताम् or अन्वभविषताम् 3rd Du) ॥ Fu—अनुभाविष्यते or अनुभविष्यते ॥ Per Fu—अनुभाविता or अनुभविता ॥ Con—अन्वभाविष्यत or अन्वभविष्यत ॥ Ben—अनुभाविषीष्ट or अनुभविषीष्ट ॥

अनुभूयते आनन्दः रामेण, त्वया अनुभूयते आनन्दः,

मया अनुभूयते आनन्दः ॥ त्वम् अनुभूयसे ॥ अहम् अनुभूये ॥

Part Pre—भूयमानः ॥ Fu—भविष्यमाणः ॥ PP—भूतः ॥

Cau—

PARASMAIPADA.

Pre—भावयामि, भावयसि, भावयति ॥ Pot—भावयेयम्, भावयेः, भावयेत् ॥ Imp—भावयानि, भावय, भावयतु ॥ Impf—अभावयम्, अभावयः, अभावयत् ॥ Perf—भावयां चकार or आस or बभूव ॥ Aor—अबीभवम्, अबीभव, अबीभवत् ॥ Fu—भावयिष्यामि, भावयिष्यसि, भावयिष्यति ॥ Per Fu—भावयितास्मि, भावयितासि, भावयिता ॥ Con—अभावयिष्यत् ॥ Ben—भाव्यासम्, भाव्याः, भाव्यात् ॥

ATMANEPADA.

Pre—भावये, भावयसे, भावयते ॥ Pot—भावयेय, भावयेः, भावयेत् ॥ Imp—भावयै, भावयस्व, भावयताम् ॥ Impf—अभावये, अभावयथाः, अभावयत ॥ Perf—भावयां चक्रे or आसे or बभूवे ॥ Aor—अबीभवे, अबीभवथाः, अबीभवत ॥ Fu—भावयिष्ये, भावयिष्यसे, भावयिष्यते ॥ Per Fu—भावयिताहे, भावयितासे, भावयिता ॥ Con—अभावयिष्यम्, अभावयिष्यथाः, अभावयिष्यत ॥ Ben—भावयिषीय, भावयिषीष्ठाः भावयिषीष्ट ॥

Causative Passive (ण्यन्तात् कर्मवाच्ये)—Pre—भाव्ये, भाव्यसे, भाव्यते ॥ Pot—भाव्येय, भाव्येथाः, भाव्येत ॥ Imp—भाव्यै, भाव्यस्व, भाव्यताम् ॥ Impf—अभाव्ये, अभाव्यथाः, अभाव्यत ॥ Perf—भावयांचक्रे or आसे or बभूवे ॥ Aor—अभावयिषि or अभाविषि ; अभावयिष्ठाः or अभाविष्ठाः ; अभावि (अभावयिषाताम् or अभाविषाताम् 3rd Du) ॥ Fu—भाविष्ये or भावयिष्ये ; भावयिष्यथे, or भाविष्यसे ; भावयिष्यते or भाविष्यते ॥ Per Fu—भावयिताहे or भाविताहे ; भावयितासे or भावितासे ; भाविता or भावयिता ॥ Con—अभावयिष्ये or अभाविष्ये ; अभावयिष्यथाः or अभाविष्यथाः ; अभावयिष्यत or अभाविष्यत ॥ Ben—भावयिषीय or भाविषीय ; भावयिषीष्ठाः or भाविषीष्ठाः ; भावयिषीष्ट or भाविषीष्ट ॥

Des—

PARASMAIPADA.

Pre—बुभूषामि, बुभूषसि, बुभूषति ॥

Pot—बुभूषेयम्, बुभूषेयः, बुभूषेत् ॥

Imp—बुभूषाणि, बुभूष, बुभूषतु ॥

Impf—अबुभूषम्, अबुभूषः, अबुभूषत् ॥

Perf—बुभूषांचकार or आस or बभूव, बुभूषांचकर्थ or

आसिथ or बभूविथ, बुभूषांचकार or आस or बभूव ॥

Aor—अबुभूषिषम्, अबुभूषिषीः, अबुभूषिषीत् ॥

Fu—बुभूषिष्यामि, बुभूषिष्यसि, बुभूषिष्यति ॥

Per Fu—बुभूषितास्मि, बुभूषितासि, बुभूषिता ॥

Con—अबुभूषिष्यम्, अबुभूषिष्यः, अबुभूषिष्यत् ॥

Ben—बुभूष्यासम्, बुभूष्याः, बुभूष्यात् ॥

ATMANEPADA.

Pre—बुभूषे, बुभूषसे, बुभूषते ॥

Pot—बुभूषेय, बुभूषेथाः, बुभूषेत ॥

Imp—बुभूषै, बुभूषस्व, बुभूषताम् ॥

Perf—बुभूषांचक्रे or आसे or बभूवे ॥

Aor—अबुभूषिषि, अबुभूषिष्ठाः, अबुभूषिष्ट ॥

Fu—बुभूषिष्ये, बुभूषिष्यसे, बुभूषिष्यते ॥

Per Fu—बुभूषिताहे, बुभूषितासे, बुभूषिता ॥

Con—अबुभूषिष्ये, अबुभूषिष्यथाः, अबुभूषिष्यत ॥

Ben—बुभूषिषीय, बुभूषिषीष्ठाः, बुभूषिषीष्ट ॥

Desiderative Passive (सनन्तात् कर्मवाच्ये)—

Pre—बुभूष्ये, बुभूष्यसे, बुभूष्यते ॥

Pot—बुभूष्येय, बुभूष्येथाः, बुभूष्येत ॥

Imp—बुभूष्यै, बुभूष्यस्व, बुभूष्यताम् ॥

Impf—अबुभूषे, अबुभूषथाः, अबुभूषत ॥

Perf—बुभूषांचक्रे or आसे or बभूवे ॥

Aor—अबुभूषिषि, अबुभूषिष्ठाः, अबुभूषि ॥

Fu—बुभूषिष्ये, बुभूषिष्यसे, बुभूषिष्यते ॥

Per Fu—बुभूषिताहे, बुभूषितासे, बुभूषिता ॥

Con—अबुभूषिष्ये, अबुभूषिष्यथाः, अबुभूषिष्यत ॥

Ben—बुभूषिषीय, बुभूषिषीष्ठाः, बुभूषिषीष्ट ॥

Fre—

Pre—बोभूये, बोभूयावहे, बोभूयामहे ; बोभूयसे, बोभूयेथे, बोभूयध्वे ; बोभूयते, बोभूयेते, बोभूयन्ते ॥

Pot—बोभूयेय, बोभूयेवहि, बोभूयेमहि ; बोभूयेथाः, बोभूयेयाथाम्, बोभूयेध्वम् ; बोभूयेत, बोभूयेयाताम्, बोभूयेरन् ॥

Imp—बोभूयै, बोभूयावहै, बोभूयामहै ; बोभूयस्व, बोभूयेथाम्, बोभूयध्वम् ; बोभूयताम्, बोभूयेताम्, बोभूयन्ताम् ॥

Impf—अबोभूये, अबोभूयावहि, अबोभूयामहि ; अबोभूयथाः, अबोभूयेथाम्, अबोभूयध्वम् ; अबोभूयत, अबोभूयेताम्, अबोभूयन्त ॥

Perf—बोभूयांचक्रे or आसे or बभूवे ॥

Aor—अबोभूयिषि, अबोभूयिष्वहि, अबोभूयिष्महि ; अबो-

भूयिष्ठाः, अबोभूयिषाथाम्, अबोभूयिध्वम्; अबोभूयिष्ट, अबोभूयिषाताम्, अबोभूयिषत ॥

Fu—बोभूयिष्ये, बोभूयिष्यसे, बोभूयिष्यते ॥

Per Fu—बोभूयिताहे, बोभूयितासे, बोभूयिता ॥

Con—अबोभूयिष्ये, अबोभूयिष्यथाः, अबोभूयिष्यत ॥

Ben—बोभूयिषीय, बोभूयिषीवहि, बोभूयिषीमहि; बोभूयिषीष्ठाः, बोभूयिषीयाथाम्, बोभूयिषीध्वम्; बोभूयिषीष्ट, बोभूयिषीयाताम्, बोभूयिषीरन् ॥

Kṛi—भवितव्यः, भवनीयः, भव्यः ॥ Pre—(अत्) भवत् ॥ Fu—(अत्) भविष्यत् ॥ Past—भूत्वा, अनु+भू=अनुभूयः ॥ Pre—(आन) भूयमानः ॥ Fu—(आन) भविष्यमानः ॥ Past—भूतः ॥ Inf—भवितुम्, (णिच्) भावयितुम् ॥

भू—चुरा A. to obtaining. भू may be used in the Atmanepada after certain preposition Even by itself it is used in the senes of obtaining. Pre—भावये or भवे; भावयसे or भवसे; भावयते or भवते ॥ Pot—भावयेत or भवेत ॥ Imp—भावयेताम् or भवताम् ॥ Impf—अभावयत or अभावत ॥ Perf—भावयां चक्रे or आसे or बभूवे ॥ Aor—अबोभवत or अभूत ॥ Fu—भावयिष्यते or भविष्यते ॥ Per Fu—भावयिता or भविता ॥ Con—अभावयिष्यत or अभविष्यत ॥

Ben—भावयिषीष्ट or भविषीष्ट ॥ Pas—भाव्यते or भूयते ॥

भूष्—भ्वा P. to adorn. Pre—भूषति ॥ Pot—भूषेत् ॥ Imp—भूषतु ॥ Impf—अभूषत् ॥ Perf—बुभूष, बुभूषिथ, बुभूष (बुभूषतुः 3rd Du) ॥ Aor—अभूषिषम्, अभूषीः, अभूषीत् ॥ Fu—भूषिष्यति ॥ Per Fu—भूषिता ॥ Con—अभूषिष्यत् ॥ Ben—भूष्यात् ॥ Pas—भूष्यते, अभूषि ॥ Cau—भूषयति ॥ Aor—अबुभूषत् ॥ Des—बुभूषिषति ॥ Fre—बोभूष्यते ॥ Kṛi—भूषितव्यः, भूषणीयः ॥ PP—भूषितः ॥ IP—भूषित्वा ॥ Inf—भूषितुम् ॥

भूष्—चुरा U. to adorn. Pre—भूषयति or ते ॥ Pot—भूषयेत् or त ॥ Imp—भूषयतु or भूषयताम् ॥ Impf—अभूषयत् or त ॥ Perf—भूषयांचकार or चक्रे or आस or आसे or बभूव or बभूवे ॥ Aor—अबुभूषत् or त ॥ Fu—भूषयिष्यति or ते ॥ Per Fu—भूषयिता ॥ Con—अभूषयिष्यत् or त ॥ Ben—भूष्यते, Aor—अभूषि ॥ Des—बुभूषयिषति or ते ॥ Fre—बोभूष्यते ॥ Kṛi—भूषयितव्यः ॥ PP—भूषितः ॥ IP—भूषयित्वा ॥ Inf—भूषयितुम् ॥

भृ (भृञ्)—भ्वा U. to nourish, to fill, to carry. Pre—भरति or भरते ॥ Pot—भरेत् or भरेत ॥ Imp—भराणि or भरै ; भर or भरस्व ; भरतु or

भरताम् ॥ Impf—अभरम् or अभरे; अभरः or अभरथाः; अभरत् or अभरत ॥ Perf—बभार or बभर or बभ्रे, बभृव or बभृवहि; बभर्थ or बभृषे, बभ्रथुः or बभ्राथे; बभार or बभ्रे, बभ्रतुः or बभ्राते ॥ Aor—अभार्षम् or अभृषि; अभार्षीः or अभृथाः; अभार्षीत् or अभृत ॥ Fu—भरिष्यति or भरिष्यते ॥ Per Fu—भर्ता ॥ Con—अभरिष्यत् or अभरिष्यते ॥ Ben—भ्रियात् or भृषीष्ट ॥ Pas—भ्रियते, Aor—अभारि ॥ Cau—भारयति, Aor—अबीभरत् ॥ Des—बिभरिषति or ते or बुभूर्षति or ते ॥ Fre—बेभ्रीयते ॥ Kṛi—भर्तव्यः, भरणीयः ॥ PP—भृतः ॥ Inf—भर्तुम् ॥ दरिद्रान् भर कौन्तेय ॥

भृ (भृञ्)—जुहो U. to carry, to nourish.

Pre—

PARASMAIPADA.

बिभर्मि	बिभृवः	बिभृमः
बिभर्षि	बिभृथः	बिभृथ
बिभर्ति	बिभृतः	बिभ्रति

ATMANEPADA.

बिभ्रे	बिभृवहे	बिभृमहे
बिभृषे	बिभ्राथे	बिभृध्वे
बिभृते	बिभ्राते	बिभ्रते

Pot—बिभृयाम् or बिभ्रीय ; बिभृया or बिभ्रीथाः; बिभृयात् or बिभ्रीत ॥ Imp—बिभराणि or बिभरै, बिभराव or बिभरावहै ; बिभृहि or बिभृष्व, बिभृतम् or बिभ्राथाम् ; बिभर्तु or बिभृताम, बिभृताम् or बिभ्राताम् (बिभ्रतु or बिभ्रताम् 3rd Plu) ॥

Impf—

PARASMAIPADA.

अबिभरम्	अबिभृव	अबिभृम
अबिभः	अबिभृतम्	अबिभृत
अबिभः	अबिभृताम्	अबिभरुः

ATMANEPADA.

अबिभ्रि	अबिभृवहि	अबिभृमहि
अबिभृथाः	अबिभ्राथाम्	अबिभृध्वम्
अबिभृत	अबिभ्राताम्	अबिभ्रत

Perf—

PARASMAIPADA.

बभार or बभर	बभृव	बभृम
बभर्थ	बभ्रथुः	बभ्र
बभार	बभ्रतुः	बभ्रुः

or

बिभरांचकार	बिभरांचकृव	बिभरांचकृम
बिभरांचकर्थ	बिभरांचक्रथुः	बिभरांचक्र
बिभरांचकार	बिभरांचक्रतुः	बिभरांचक्रुः

or

...आस	...आसिव	...आसिम
...आसिथ	...आसथुः	...आस
...आस	...आसतुः	आसुः

or

...बभूव	...बभूविव	...बभूविम
...बभूविथ	...बभूवथुः	...बभूव
...बभूव	...बभूवतुः	...बभूवुः

ATMANEPADA.

बभ्रे	बभृवहे	बभृमहे
बभृषे	बभ्राथे	बभृढ्वे
बभ्रे	बभ्राते	बभ्रिरे

or

बिभरां चक्रे	बिभरां चकृवहे	बिभरां चकृमहे
बिभरां चकृषे	बिभरां चक्राथे	बिभरां चकृढ्वे
बिभरां चक्रे	बिभरां चक्राते	बिभरां चक्रिरे

or

...आस or बभूव Like—Parasmaipada.

Aor—

PARASMAIPADA.

अभार्षम्	अभार्ष्व	अभार्ष्म
अभार्षीः	अभार्ष्टम्	अभार्ष्ट
अभार्षीत्	अभार्ष्टाम्	अभार्षुः

ATMANEPADA.

अभृषि	अभृष्वहि	अभृष्महि
अभृथाः	अभृषाथाम्	अभृढ्वम्
अभृत	अभृषाताम्	अभृषत

Fu—भरिष्यति or भरिष्यते ॥ Per Fu—भर्तास्मि or भर्ताहे ; भर्तासि or भर्तासे ; भर्ता ॥ Con—अभरिष्यम् or अभरिष्ये ; अभरिष्यः or अभरिष्यथाः ; अभरिष्यत् or अभरिष्यत ॥ Ben—भ्रियासम् or भृषीय ; भ्रियाः or भृषीष्ठाः ; भ्रियात् or भृषीष्ट ॥ Pas—भ्रियते, Aor—अभारि ॥ Cau—भारयति or ते, Aor—अबीभरत् or त ॥ Des—बुभूर्षति or ते ॥ Fre—बेभ्रीयते ॥ Kṛi—भर्तव्यः, भरणीयः ॥ PP—भृतः ॥ Inf—भर्तुम् ॥

धुरं धरित्र्या बिभरांबभूव ॥

भृज् (भृजी)—भ्वा A. to parch, to fry. Pre—भर्जते ॥ Pot—भर्जेत ॥ Imp—भर्जतु ॥ Impf—अभर्जत ॥ Perf—बभृजे ॥ Aor—अभर्जिष्ट ॥ Fu—भर्जिष्यते ॥ Per Fu—भर्जिता ॥ Con—अभर्जिष्यत ॥ Ben—भर्जिषीष्ट ॥ Pas—भृज्यते, Aor—अभर्जि ॥ Cau—भर्जयति or ते, Aor—अबीभृजत् or अबभर्जत् ॥ Des—बिभर्जिषते ॥ Fre—बरीभृज्यते ॥ Kṛi—भर्जितव्यः, भर्जनीयः ॥ PP—भृक्तः ॥ IP—भर्जित्वा or भृक्त्वा ॥ Inf—भर्जितुम् ॥

भ्रंशु—भ्वा A. (अस्य भ्वादिपाठस्तु मैत्रेयप्रभृतिसम्मतः) to escape, to decline. Pre—भ्रंशते ॥ Pot—भ्रंशेत ॥ Imp—भ्रंशताम् ॥ Impf—अभ्रंशत ॥ Perf—बभ्रंशे ॥ Aor—अभ्रशत् or अभ्रंशिष्ट ॥ Fu—भ्रंशिष्यते ॥ Per Fu—भ्रंशिता ॥ Con—अभ्रंशिष्यत ॥ Ben—भ्रंशिषीष्ट ॥ Pas—भ्रश्यते Aor—अभ्रंशि ॥ Cau—भ्रंशयति, Aor—अबभ्रंशत् ॥ Des—बिभ्रंशिषते ॥ Fre—बाभ्रश्यते ॥ PP—भ्रष्टः ॥ IP—भ्रंशित्वा or भ्रष्ट्वा ॥ Inf—भ्रंशितुम् ॥

भ्रंश्—दिवा P. to fall, to decline, to escape. Pre—भ्रश्यति ॥ Pot—भ्रश्येत्॥ Imp—भ्रश्यतु ॥ Impf—अभ्रश्यत् ॥ Perf—बभ्रंश, बभ्रंशिव ; बभ्रंशिथ, बभ्रंशथुः ; बभ्रंश बभ्रंशतुः ॥ Aor—अभ्रशम्, अभ्रशः, अभ्रशत् ॥ Fu—भ्रंशिष्यति ॥ Per Fu—भ्रंशिता ॥ Con—अभ्रंशिष्यत् ॥ Ben—भ्रश्यात् ॥ Pas—भ्रश्यते, Aor—अभ्रंशि ॥ Cau—भ्रंशयति, Aor—अबभ्रंशत् ॥ Des—बिभ्रंशिषति ॥ Fre—बाभ्रश्यते ॥ Kri—भ्रंशितव्यः ॥ PP—भ्रष्टः ॥ IP—भ्रंशित्वा or भ्रष्ट्वा ॥ Inf—भ्रंशितुम् ॥

भ्रंस्—भ्वा A. and दिवा P. to fall down. Pre—भ्रंसते or भ्रस्यति ॥ Same as भ्रंश् ॥

भ्रम्—भ्वा P. to roam, to totter, to surround.

Pre—

भ्रमामि	भ्रमावः	भ्रमामः
or	or	or
भ्रम्यामि	भ्रम्यावः	भ्रम्यामः
भ्रमसि	भ्रमथः	भ्रमथ
or	or	or
भ्रम्यसि	भ्रम्यथः	भ्रम्यथ
भ्रमति	भ्रमतः	भ्रमन्ति
or	or	or
भ्रम्यति	भ्रम्यतः	भ्रम्यन्ति

Pot—भ्रमेत् or भ्रम्येत् ॥ Imp—भ्रमतु or भ्रम्यतु ॥ Impf—अभ्रमत् or अभ्रम्यत् ॥

Perf—

बभ्राम	बभ्रमिव	बभ्रमिम
or	or	or
बभ्रम	भ्रेमिव	भ्रेमिम
बभ्रमिथ	बभ्रमथुः	बभ्रम
or	or	or
भ्रेमिथ	भ्रेमथुः	भ्रेम
बभ्राम	बभ्रमतुः	बभ्रमुः
	or	or
	भ्रेमतुः	भ्रेमुः

Aor—अभ्रमिषम्, अभ्रमीः, अभ्रमीत् ॥ Fu—

भ्रमिष्यति ॥ Per Fu—भ्रमिता ॥ Con—अभ्रमिष्यत् ॥ Ben—भ्रम्यात् ॥ Pas—भ्रम्यते, Aor—अभ्रामि ॥ Cau—भ्रमयति, Aor—अबिभ्रमत् ॥ Des—बिभ्रमिषति ॥ बम्भ्रम्यते ॥ Kṛi—भ्रमितव्यः ॥ PP—भ्रान्तः ॥ IP—भ्रमित्वा or भ्रान्त्वा ॥ Inf—भ्रमितुम् ॥

भ्रम्—दिवा P. to roam. Pre—भ्राम्यति or भ्रमति ॥ Pot—भ्राम्येत् or भ्रमेत् ॥ Imp—भ्राम्यतु or भ्रमतु ॥ Impf—अभ्राम्यत् or अभ्रमत् ॥ Perf—बभ्राम or बभ्रम (same as भ्वा—भ्रम्) ॥

Aor—

अभ्रमम्	अभ्रमाव	अभ्रमाम
अभ्रमः	अभ्रमतम्	अभ्रमत
अभ्रमत्	अभ्रमताम्	अभ्रमन्

Fu—भ्रमिष्यति ॥ Per Fu—भ्रमिता ॥ Con—अभ्रमिष्यत् ॥ Ben—भ्रम्यात् ॥ Pas—भ्रम्यते, Aor—अभ्रामि ॥ Cau—भ्रमयति (भ्रामयति), Aor—अबिभ्रमत् ॥ Des—बिभ्रमिषति ॥ Fre—बम्भ्रम्यते ॥ Kṛi—भ्रमितव्यः ॥ PP—भ्रान्तः ॥ IP—भ्रमित्वा or भ्रान्त्वा ॥ Inf—भ्रमितुम् ॥ लोकेऽस्मिन् भ्रमाम्येकः ॥ बभ्राम तत्र तत्रैव ॥ दृष्टिर्भ्राम्यति मे ॥ भ्रेमुः शिलोच्चयांस्तुङ्गान् ॥ तत्रैवाबिभ्रमद्देवी ॥ उत्क्षिप्याभ्रामयेद्देहम् ॥ भ्रामयित्वा शतगुणम् ॥ भ्रान्तं देशमनेकदुर्गविषमम् ॥

भ्रस्ज्—तुदा U. to fry.

Pre—

PARASMAIPADA

भृज्जामि	भृज्जावः	भृज्जामः
भृज्जसि	भृज्जथः	भृज्जथ
भृज्जति	भृज्जतः	भृज्जन्ति

ATMANEPADA.

भृज्जे	भृज्जावहे	भृज्जामहे
भृज्जसे	भृज्जेथे	भृज्जध्वे
भृज्जते	भृज्जेते	भृज्जन्ते

Pot—

PARASMAIPADA.

भृज्जेयम्	भृज्जेव	भृज्जेम
भृज्जेः	भृज्जेतम्	भृज्जेत
भृज्जेत्	भृज्जेताम्	भृज्जेयुः

ATMANEPADA.

भृज्जेय	भृज्जेव	भृज्जेम
भृज्जेथाः	भृज्जेयाथाम्	भृज्जेध्वम्
भृज्जेत	भृज्जेयाताम्	भृज्जेरन्

Imp—

PARASMAIPADA.

भृज्जानि	भृज्जाव	भृज्जाम

भृज्ज	भृज्जतम्	भृज्जत
भृज्जतु	भृज्जताम्	भृज्जन्तु

ATMANEPADA.

भृज्जै	भृज्जावहै	भृज्जामहै
भृज्जस्व	भृज्जेथाम्	भृज्जध्वम्
भृज्जताम्	भृज्जेताम्	भृज्जन्ताम्

Impf—

PARASMAIPADA.

अभृज्जम्	अभृज्जाव	अभृज्जाम
अभृज्जः	अभृज्जतम्	अभृज्जत
अभृज्जत्	अभृज्जताम्	अभृज्जन्

ATMANEPADA.

अभृज्जे	अभृज्जावहि	अभृज्जामहि
अभृज्जथाः	अभृज्जेथाम्	अभृज्जध्वम्
अभृज्जत	अभृज्जेताम्	अभृज्जन्त

Perf—

PARASMAIPADA.

बभर्ज	बभर्जिव	बभर्जिम
or	or	or
बभ्रज्ज	बभ्रज्जिव	बभ्रज्जिम
बभर्जिथ or बभर्ष्ठ	बभर्जथुः	बभर्ज
or	or	or

बभ्रज्जिथ or बभ्रष्ठ	बभ्रज्जथुः	बभ्रज्ज
बभर्ज	बभर्जतुः	बभर्जुः
or	or	or
बभ्रज्ज	बभ्रज्जतुः	बभ्रज्जुः

ATMANEPADA.

बभर्जे	बभर्जिवहे	बभर्जिमहे
or	or	or
बभ्रज्जे	बभ्रज्जिवहे	बभ्रज्जिमहे
बभर्जिषे	बभर्जाथे	बभर्जिध्वे
or	or	or
बभ्रज्जिषे	बभ्रज्जाथे	बभ्रज्जिध्वे
बभर्जे	बभर्जाते	बभर्जिरे
or	or	or
बभ्रज्जे	बभ्रज्जाते	बभ्रज्जिरे

Aor—

PARASMAIPADA.

अभार्क्षम्	अभार्क्ष्व	अभार्क्ष्म
or	or	or
अभ्राक्षम्	अभ्राक्ष्व	अभ्राक्ष्म
अभार्क्षीः	अभार्ष्टम्	अभार्ष्ट
or	or	or
अभ्राक्षीः	अभ्राष्टम्	अभ्राष्ट

अभार्क्षीत् अभार्ष्टाम् अभार्क्षुः
or or or
अभ्राक्षीत् अभ्राष्टाम् अभ्राक्षुः

ATMANEPADA.

अभर्क्षि अभर्क्ष्वहि अभर्क्ष्महि
or or or
अभ्रक्षि अभृक्ष्वहि अभृक्ष्महि

अभर्ष्ठाः अभर्क्षाथाम् अभर्ढ्वम्
or or or
अभृष्ठाः अभ्रक्षाथाम् अभृग्ध्वम्

अभर्ष्ट अभर्क्षाताम् अभर्क्षत
or or or
अभृष्ट अभक्षाताम् अभृक्षत

Fu—भर्क्ष्यति or भ्रक्ष्यति or भर्क्ष्यते or भ्रक्ष्यते ॥ Per Fu—भर्ष्टा or भ्रष्टा ॥ Con—अभर्क्ष्यत् or अभ्रक्ष्यत् or अभर्क्ष्यत or अभ्रक्ष्यत ॥ Ben—P—भृज्ज्यासम्, भृज्ज्याः, भृज्ज्यात् ॥ A—भर्क्षीय or भ्रक्षीय भर्क्षीष्ठाः or भ्रक्षीष्ठाः ; भर्क्षीष्ट or भ्रक्षीष्ट (भर्क्षीयास्ताम् or भ्रक्षीयास्ताम् 3rd Du) ॥ Pas—भृज्ज्यते, Aor—अभर्जि ॥ Cau—भर्जयति or भ्रज्जयति or ते, Aor—अबभर्जत् or अबभ्रज्जत् or त ॥ Des—P—बिभर्क्षति or बिभ्रक्षति or बिभर्जिषति or बिभ्रज्जिषति ॥ A—बिभर्क्षते or बिभ्रक्षते or

विभर्जिषते or बिभ्रज्जिषते ॥ Fre—बरीभृज्ज्यते ॥ PP—भृष्टः ॥ (भ्रष्टः, भृष्टवान्) ॥ Inf—भृष्टुम् ॥

भ्राज्—भ्वा A. to shine. Pre—भ्राजते ॥ Imp—भ्राजताम् ॥ Impf—अभ्राजत ॥ Perf—बभ्राजे or भ्रेजे ॥ Aor—अभ्राजिष्ट ॥ Fu—भ्राजिष्यते ॥ Per Fu—भ्राजिता ॥ Con—अभ्राजिष्यत ॥ Ben—भ्राजिषीष्ट ॥ Pas—भ्राज्यते, Aor—अभ्राजि ॥ Cau—भ्राजयति or ते, Aor—अबीभ्रजत् or अबभ्राजत् ॥ Des—बिभ्राजिषते ॥ Fre—बाभ्राज्यते ॥ PP—भ्राजितः ॥ IP— भ्राजित्वा ॥ Imf—भ्राजितुम् ॥ अग्नेर्भ्राजन्ते अर्चयः ॥ भ्राजसे विद्यया च तपसा च ॥ भ्राजमानो यथा रविः ॥

म.

मण्ड् (मडि)—भ्वा P. to decorate. Pre—मण्डति ॥ Perf—ममण्ड ॥ Aor—अमण्डीत् ॥ Fu—मण्डिष्यति ॥ Per Fu—मण्डिता ॥ Con—अमण्डिष्यत् ॥ Ben—मण्ड्यात् ॥ Pas—मण्ड्यते, Aor—अमण्डि ॥ Cau—मण्डयति, Aor—अममण्डत् ॥ Des—मिमण्डिषति ॥ Fre—मामण्ड्यते ॥ PP—मण्डितः ॥ IP—मण्डित्वा ॥ Inf—मण्डितुम् ॥

मण्ड् (मडि)—चुरा U. to decorate, to adorn. Pre—मण्डयति ॥

मद् (मदी)—दिवा P. to be glad. Pre—माद्यति ॥

Perf—ममाद ॥ Aor—अमादीत् or अमदीत् ॥ Fu—मदिष्यति ॥ Per Fu—मदिता ॥ Con—अमदिष्यत् ॥ Ben—मद्यात् ॥ Pas—मद्यते, Aor—अमादि ॥ Cau—मादयति, Aor—अमीमदत् ॥ Des—मिमदिषति ॥ Fre—मामद्यते ॥ PP—मत्तः ॥ IP—मदित्वा ॥ Inf—मदितुम् ॥ धर्मात् प्रमाद्यति ॥

मद् (मदी)—भ्वा P to be proud, to be poor, to be glad. Pre—मदति ॥ Cau—मदयति (हर्षयति or ग्लेपयति, ग्लेपनं दैन्यम्) ॥ अन्यार्थे तु—मादयति = चित्तविकारमुत्पादयतीत्यर्थः ॥

मद्—चुरा A to please. Pre—मादयते ॥ Perf—मादयां चक्रे or आसे or बभूवे ॥ Aor—अमीमदत ॥ Fu—मादयिष्यते ॥ Inf—मादयितुम् ॥

मन्—दिवा A. to know, to think Pre—मन्ये, मन्यसे, मन्यते ॥ Pot—मन्येय, मन्येथाः, मन्येत ॥ Imp—मन्यै, मन्यस्व, मन्यताम् ॥ Impf—अमन्ये, अमन्यथाः, अमन्यत ॥ Perf—मेने, मेनिषे, मेने (मेनाते, मेनिरे 3rd Du, and Plu) ॥ Aor—अमंसम्, अमंस्थाः, अमंस्त (अमंसाताम् 3rd Du) ॥ Fu—मंस्यते ॥ Per Fu—मन्ता ॥ Con—अमंस्यत ॥ Ben—मंसीष्ट ॥ Pas—मन्यते ॥ Cau—मानयति or ते, Aor—अमीमनत् ॥ Des—मिमंसते ॥ Kri—मन्तव्यः, मननीयः ॥ PP—मतः ॥ IP—

मत्वा ॥ Inf—मन्तुम् ॥ न त्वां तृणं मन्ये or न त्वां तृणाय मन्ये ॥

मन्—तना A. to consider. Pre—मन्वे, मनुवहे ; मनुषे, मन्वाथे ; मनुते, मन्वाते ॥ Pot—मन्वीय, मन्वीथाः, मन्वीत ॥ Imp—मन्वै, मनुष्व, मनुताम् ॥ Impf—अमन्वि, अमनुथाः, अमनुत ॥ Perf—मेने ॥ Aor—अमनिषि, अमनिष्ठाः or अमथाः ; अमनिष्ट or अमत ॥ Fu—मनिष्यते ॥ Per Fu—मनिता ॥ Con—अमनिष्यत ॥ Ben—मनिषीष्ट ॥ Pas—मन्यते, Aor—अमानि ॥ Cau—मानयति ॥ Des—मिमनिषते ॥ Fre—मंमन्यते ॥ Kṛi—मननीयः ॥ PP—मतः ॥ IP—मनित्वा or मत्वा ॥ Inf—मनितुम् ॥

मन्त्र् (मत्रि)—चुरा U. to consult, to advise, to speak. Pre—मन्त्रयति or ते ॥ Impf—अमन्त्रयत् or त ॥ Perf—मन्त्रयांचकार or चक्रे or आस or बभूव ॥ Aor—अममन्त्रत् or त ॥ Fu—मन्त्रयिष्यति or ते ॥ Per Fu—मन्त्रयिता ॥ Con—अमन्त्रयिष्यत् or त ॥ Ben—मन्त्र्यात् or मन्त्रयिषीष्ट ॥ Pas—मन्त्र्यते, Aor—अमन्त्रि ॥ Cau—अमन्त्रयत् or ते ॥ Des—मिमन्त्रिषति or ते ॥ PP—मन्त्रितः ॥ IP—मन्त्रयित्वा ॥ Inf—मन्त्रयितुम् ॥

मन्थ—भ्वा-क्र्या P. to shake, to churn, to destroy.

Pre—मन्थति or मथ्नाति ॥ Pot—मथ्नीयात् or मन्थेत् ॥ Imp—मन्थतु or मथ्नातु ॥ Impf—अमन्थत् or अमथ्नात् ॥ Perf—ममन्थ (ममन्थतुः 3rd Du) ॥ Aor—अमन्थीत् ॥ Fu—मन्थिष्यति ॥ Per Fu—मन्थिता ॥ Con—अमन्थिष्यत् ॥ Ben—मथ्यात् or मन्थ्यात् ॥ Pas—मथ्यते or मन्थ्यते, Aor—अमन्थि ॥ Cau—मन्थयति, Aor—अममन्थत् ॥ Des—मिमन्थिषति ॥ Fre—मामथ्यते or मामन्थ्यते ॥ Kri—मन्थितव्यः, मन्थनीयः, मन्थ्यः ॥ PP—मथितः or मन्थितः ॥ IP—मथित्वा or मन्थित्वा, प्र+मन्थ्=प्रमथ्य ॥ Inf—मन्थितुम् ॥

मस्ज्—तुदा P. to purify, to bathe, to sink. Pre—मज्जामि, मज्जसि, मज्जति (मज्जतः, मज्जन्ति 3rd Du, Plu) ॥ Pot—मज्जेत् ॥ Imp—मज्जतु ॥ Impf—अमज्जत् ॥ Perf—ममज्ज, ममज्जिव ; ममज्जिथ or ममङ्क्थ, ममज्जथुः ; ममज्ज, ममज्जतुः ॥ Aor—अमाङ्क्षम्, अमाङ्क्षीः, अमाङ्क्षीत् (अमाङ्क्ताम्, अमाङ्क्षुः 3rd Du, Plu) ॥ Fu—मङ्क्ष्यति ॥ Per Fu—मङ्क्ता ॥ Con—अमङ्क्ष्यत् ॥ Ben—मज्ज्यात् ॥ Pas—मज्ज्यते, Aor—अमज्जि ॥ Cau—मज्जयति, Aor—अममज्जत् ॥ Des—मिमङ्क्षति ॥ Fre—मामज्ज्यते॥ PP—मग्नः ॥ IP—मङ्क्त्वा or मक्त्वा ॥ Inf—मङ्क्तुम् ॥

मह्—भ्वा P. चुरा U. to honour, to delight, to

increase. Pre—मह्लति or मह्लयति or ते ॥ Perf—ममाह्ल or मह्लयां चकार or चक्रे (मह्लतुः or मह्लयां चक्रतुः or चक्राते 3rd Du) ॥ Aor—अमह्लीत् or अमीमह्लत् ॥ Fu—मह्लिष्यति or मह्लयिष्यति or ते ॥ Per Fu—मह्लिता or मह्लयिता ॥ Des—मिमह्लिषति or मिमह्लयिषति or ते ॥ Fre—मामह्ल्यते ॥ PP—मह्लितः or मह्लयितः ॥ IP—मह्लित्वा or मह्लयित्वा ॥ Inf—मह्लितुम् or मह्लयितुम् ॥

मह्ली—कण्ड्वादि A. to honour. Pre—मह्लीयते ॥ Imp—मह्लीयताम् ॥

मा—अदा P. to measure. Pre—माति ॥ Pot—मायात् ॥ Imp—मातु ॥ Impf—अमात् ॥ Perf—ममौ, ममिव ; ममाथ or ममिथ, ममथुः ; ममौ, ममतुः ॥ Aor—अमासिषम्, अमासीः, अमासीत् ॥ Fu—मास्यति ॥ Per Fu—माता ॥ Con—अमास्यत् ॥ Ben—मेयात् (मेयास्ताम्, मेयासुः 3rd Du, Plu) ॥ Pas—मीयते, Aor—अमायि ॥ Cau—मापयति, Aor—अमीमपत् ॥ Des—मित्सति ॥ Fre—मेमीयते ॥ PP—मितः ॥ IP—मित्वा ; प्र + मा = प्रमाय ॥ Inf—मातुम् ॥

मा (माङ्)—जुहु A. to measure. Pre—मिमे, मिमीवहे, मिमीमहे ; मिमीषे, मिमाथे, मिमीध्वे ; मिमीते, मिमाते, मिमते ॥ Pot—मिमीय, मिमीथाः

मिमीत (मिमीयाताम् 3rd Du) ॥ Imp—मिमै, मिमीष्व, मिमीताम् (मिमाताम्, मिमताम् 3rd Du, Plu) ॥ Impf—अमिमि, अमिमीवहि ; अमिमीथाः, अमिमाथाम् (अमिमीध्वम् 2nd Plu) ; अमिमीत, अमिमाताम् (अमिमत 3rd Plu) ॥ Perf—ममे, ममिवहे, ममिमहे ; मिमषे, ममाथे, ममिध्वे ; ममे, ममाते, ममिरे ॥ Aor—अमासि, अमास्वहि, अमास्महि ; अमास्थाः अमासाथाम्, अमाध्वम् ; अमास्त, अमासाताम्, अमासत ॥ Fu—मास्यते ॥ Per Fu—माता ॥ Con—अमास्यत ॥ Ben—मासीष्ट ॥ Pas—मीयते, Aor—अमायि ॥ Cau—मापयति, Aor—अमीमपत् ॥ Des—मित्सते ॥ Fre—मेमीयते ॥ Kṛi—मातव्यः ॥ PP—मितः ॥ IP—मित्वा ॥ Inf—मातुम् ॥

मा (माङ्)—दिवा A. to measure. Pre—मायते ॥ Pot—मायेत ॥ Imf—मायताम् ॥ Impf—अमायत ॥ Perf—ममे ॥ Aor—अमास्त ॥ Fu—मास्यते ॥ Per Fu—माता ॥ Ben—मासीष्ट ॥ etc.

मान्—भ्वा A. to knowledge, to search, to seek. Pre—मीमांसते ॥ Pot—मीमांसेत ॥ Imp—मीमांसताम् ॥ Impf—अमीमांसत ॥ Perf—मीमांसांबभूव or आस or चक्रे ॥ Aor—अमीमांसिष्ट ॥ Fu—मीमांसिष्यते ॥ Per Fu—मीमां-

सिता ॥ Ben—मीमांसिषीष्ट ॥ Pas—मीमांस्यते, Aor—अमीमांसि ॥ Cau—मीमांसयति ॥ Aor—अमीमांसयत् ॥ Kṛi—मीमांसितव्यम् ॥ PP—मीमांसितः ॥ IP—मीमांसित्वा ॥ Inf—मीमांसितुम् ॥

मान्—चुरा U. भ्वा P to honour. Pre—मानयति or ते or मानति ॥ Aor—अमीमनत् or त or अमानीत् ॥ Pas—मान्यते, Aor—अमानि ॥ Kṛi—मानयितव्यः or मानितव्यः, माननीयः ॥ Inf—मानयितुम् or मानितुम् ॥

मार्ज—चुरा U. to purify, to wipe. Pre—मार्जयति or ते ॥ Pot—मार्जयेत् or त ॥ Imp—मार्जयतु or ताम् ॥ Impf—अमार्जयत् or त ॥ Perf—मार्जयां चकार or चक्रे or आस or बभूव ॥ Aor—अममार्जत् or त ॥ Fu—मार्जयिष्यति or ते ॥ Per Fu—मार्जयिता ॥ Con—अमार्जयिष्यत् or त ॥ Ben—मार्ज्यात् or मार्जयिषीष्ट ॥ Pas—मार्ज्यते, Aor—अमार्जि ॥ Cau—मार्जयति or ते ॥ Des—मिमार्जयिषति or ते ॥ Kṛi—मार्जयितव्यः, मार्जनीयः ॥ PP—मार्जितः ॥ IP—मार्जयित्वा, संमार्ज्य ॥ Inf—मार्जयितुम् ॥

मि (डुमिञ्)—स्वा U. to throw. Pre—मिनोमि or मिन्वे, मिनुवः मिन्वः or मिनुवहे or मिन्वहे, मिनुमः or मिन्मः or मिनुमहे or मिन्महे ; मिनोषि or

मिनुषे, मिनुथः or मिन्वाथे, मिनुथ or मिनुध्वे ; मिनोति or मिनुते, मिनुतः or मिन्वाते, मिन्वन्ति or मिन्वते ॥ Pot—मिनुयाम् or मिन्वीय ; मिनुयाः or मिन्वीथाः ; मिनुयात् or मिन्वीत ॥ Imp—मिनवानि or मिनवै ; मिनु or मिनुष्व ; मिनोतु or मिनुताम् ॥ Impf—अमिनवम् or अमिन्वि, अमिनोः or अमिनुथाः, अमिनोत् or अमिनुत ॥ Perf—ममौ or मिम्ये, मिम्यिव or मिम्यिवहे, मिम्यिम or मिम्यिमहे ; ममाथ or ममिथ or मिम्यिषे, मिम्यथुः or मिम्याथे, मिम्य or मिम्यिध्वे ; ममौ or मिम्ये, मिम्यतुः or मिम्याते, मिम्युः or मिम्यिरे ॥ Aor—अमासीत् or अमास्त (अमासिष्टाम् or अमासाताम् 3rd Du) ॥ Fu—मास्यति or मास्यते ॥ Per Fu—माता ॥ Con—अमास्यत् or त ॥ Ben—मीयात् or मासीष्ट ॥ Pas—मीयते, Aor—अमायि ॥ Cau—मापयति, Aor—अमीमपत् ॥ Des—मित्सति or ते ॥ Fre—मेमीयते ॥ Kri—मातव्यः, मानीयः ॥ PP—मितः ॥ IP—मित्वा ॥ Inf—मातुम् ॥

मिद्—भ्वा A. to be wet. Pre—मेदते ॥ Perf—मिमिदे ॥ Aor—अमिदत् or अमेदिष्ट ॥ Fu—मेदिष्यते ॥ Per Fu—मेदिता ॥ Con—अमेदिष्यत ॥ Ben—मेदिषीष्ट ॥ Pas—(भावे) मिद्यते, Aor—अमेदि ॥ Cau—मेदयति or ते, Aor—अमीमिदत् or त ॥ Des—मिमिदिषते ॥

Fre—मेमिद्यते ॥ Kṛi—मेदितव्यम् ॥ PP—मेदिताः or मिन्नः ॥ IP—मेदित्वा or मिदित्वा ॥ Inf—मेदितुम् ॥

मिद्—दिवा P. to melt. Pre—मेद्यति ॥ Pot—मेद्येत् ॥ Imp—मेद्यतु ॥ Impf—अमेद्यत् ॥ Perf—मिमेद, मेदिथ ॥ Aor—अमिदत् ॥ Fu—मेदिष्यति ॥ Per Fu—मेदिता ॥ Con—अमेदिष्यत् ॥ Ben—मिद्यात् ॥ Pas—(भावे) मिद्यते, Aor—अमेदि ॥ Cau—मेदयति, Aor—अमीमिदत् ॥ Des—मिमिदिषति or मिमेदिषति ॥ PP—मेदितः or मिन्नः ॥ IP—मेदित्वा or मिदित्वा ॥ Inf—मेदितुम् ॥

मिल्—तुदा U. to join, to come together. Pre—मिलति or ते ॥ Pot—मिलेत् or ते ॥ Imp—मिलतु or मिलताम् ॥ Impf—अमिलत् or त ॥ Perf—मिमेल or मिमिले ॥ Aor—अमेलीत् or अमेलिष्ट ॥ Fu—मेलिष्यति or ते ॥ Per Fu—मेलिता ॥ Con—अमेलिष्यत् or त ॥ Ben—मिल्यात् or मिलिषीष्ट ॥ Pas—(भावे) मिल्यते, Aor—अमेलि ॥ Cau—मेलयति or ते, Aor—अमीमिलत् or त ॥ Des—मिमिलिषति or ते or मिमेलिषति or ते ॥ Fre—मेमिल्यते ॥ Kṛi—मेलितव्यः, मेलनीयः ॥ PP—मिलितः ॥ IP—मिलित्वा, संमिल्य ॥ Inf—मेलितुम् ॥ मिलनं

संमिलनम् इत्यनेके वदन्ति, अपाणिनीयं तत्। पाणिनीयमते तु मेलनं सम्मेलनम् इत्येव ॥

मी (मीङ्)—दिवा A. to kill. Pre—**मीयते** ॥ Pot—**मीयेत** ॥ Imp—**मीयताम्** ॥ Impf—**अमीयत** ॥ Perf—**मिम्ये** ॥ Aor—**अमेष्ट** ॥ Fu—**मेष्यते** ॥ Per Fu—**मेता** ॥ Con—**अमेष्यत** ॥ Ben—**मेषीष्ट** ॥ Pas—**मीयते**, Aor—**अमायि** ॥ Cau—**माययति** ॥ Des—**मिमीषते** ॥ Fre—**मेमीयते** ॥ PP—**मीनः** ॥ IP—**मीत्वा** ॥ Inf—**मेतुम्** ॥

मी (मीञ्)—क्रया U to kill Pre—**मीनामि** or **मीने**, **मीनीवः** or **मीनीवहे** ; **मीनासि** or **मीनीषे**, **मीनीथः**, or **मीनाथे** ; **मीनाति** or **मीनीते**, **मीनीतः** or **मीनाते** ॥ Pot—**मीनीयात्** or **मीनीत** ॥ Imp—**मीनातु** or **मीनीताम्** ॥ Impf—**अमीनात्** or **अमीनीत** ॥ Perf—**ममौ** or **मिम्ये**, **मिम्यिव** or **मिम्यिवहे** ; **ममाथ** or **ममिथ** or **मिम्यिषे**, **मिम्यथुः** or **मिम्याथे** ; **ममौ** or **मिम्ये**, **मिम्यतुः** or **मिम्याते** ॥ Aor—**अमासीत्** or **अमास्त** ॥ Fu—**मास्यति** or **मास्यते** ॥ Per Fu—**माता** ॥ Ben—**मीयात्** or **मासीष्ट** ॥ Pas—**मीयते**, Aor—**अमायि** ॥ Cau—**मापयति**, Aor—**अमीमपत्** ॥ Des—**मित्सति** or **ते** ॥ Fre—**मेमीयते** ॥ PP—**मीतः** ॥ IP—**मीत्वा**, **प्रमाय** ॥ Inf—**मातुम्** ॥

मील्—भ्वा P. to close (as the eyes), to meet. Pre—मीलति ॥ Perf—मिमील ॥ Aor—अमीलीत् ॥ Fu—मीलिष्यति ॥ Cau—मीलयति, Aor—अमिमीलत् ॥ Des—मिमीलिषति ॥ PP—मीलितः ॥ IP—मीलित्वा ॥ Inf—मीलितुम् ॥

मुच्—(मुच्लृ) तुदा U. to loosen, to set free, to leave. Pre—मुञ्चति or ते ॥ Pot—मुञ्चेत् or त ॥ Imp—मुञ्चतु or ताम् ॥ Impf—अमुञ्चत् or त ॥ Perf—मुमोच or मुमुचे ॥ Aor—अमुचत् or अमुक्त ॥ Fu—मोक्ष्यति or ते ॥ Per Fu—मोक्ता ॥ Con—अमोक्ष्यत् or त ॥ Ben—मुच्यात् or मुक्षीष्ट ॥ Pas—मुच्यते, Aor—अमोचि ॥ Cau—मोचयति or ते, Aor—अमूमुचत् or त ॥ Des—मुमुक्षति or ते ॥ Fre—मोमुच्यते ॥ PP—मुक्तः ॥ IP—मुक्त्वा ॥ Inf—मोक्तुम् ॥

मुण्ड् (मुडि)—भ्वा P. to shave, to grind. Pre—मुण्डति ॥ Perf—मुमुण्ड ॥ Aor—अमुण्डीत् ॥ Fu—मुण्डिष्यति ॥ Cau—मुण्डं करोति—मुण्डयति ॥ PP—मुण्डितः ॥ IP—मुण्डित्वा ॥

मुद्—भ्वा A. to rejoice, to be glad. Pre—मोदते ॥ Pot—मोदेत ॥ Imp—मोदताम् ॥ Impf—अमोदत ॥ Perf—मुमुदे, मुमुदिवहे ; मुमुदिषे, मुमुदाथे ; ममुदे, मुमुदाते ॥ Aor—

अमोदिष्ट ॥ Fu—मोदिष्यते ॥ Per Fu—मोदिता ॥ Con—अमोदिष्यत ॥ Ben—मोदिषीष्ट ॥ Pas—मुद्यते, Aor—अमोदि ॥ Cau—मोदयति, Aor—अमूमुदत् ॥ Des—मुमुदिषते or मुमोदिषते ॥ Fre—मोमुद्यते ॥ Kri—मोदनीयः ॥ PP—मुदितः ॥ IP—मुदित्वा or मोदित्वा ॥ Inf—मोदितुम् ॥

मुह्—दिवा P. to be foolish, to faint, to swoon. Pre—मुह्यति ॥ Pot—मुह्येत् ॥ Imp—मुह्यतु ॥ Impf—अमुह्यत् ॥ Perf—मुमोह, मुमुहिव or मुमुह्व ; मुमुहिथ or मुमोग्ध or मुमोढ, मुमुहथुः ; मुमोह, मुमुहतुः ॥ Aor—अमुहत् ॥ Fu—मोहिष्यति or मोक्ष्यति ॥ Per Fu—मोहिता or मोग्धा or मोढा ॥ Con—अमोहिष्यत् or अमोक्ष्यत् ॥ Ben—मुह्यात् ॥ Pas—मुह्यते, Aor—अमोहि ॥ Cau—मोहयति, परि+मुह्=परिमोहयति or ते, Aor—अमूमुहत् ॥ Des—मुमुहिषति or मुमोहिषति or मुमुक्षति ॥ Fre—मोमुह्यते ॥ Kri—मोहनीयः ॥ PP—मोहितः or मुग्धः or मूढः ॥ IP—मोहित्वा or मुहित्वा or मुग्ध्वा or मूढ्वा ॥ Inf—मोहितुम् or मोग्धुम् or मोढुम् ॥

मृ—तुदा A. लट्, लिङ्, लोट्, लङ्, लुङ्षु आत्मनेपदम् अन्यत्र परस्मैपदमेव ॥ to die, to perish. Pre—म्रियते ॥ Pot—म्रियेत ॥ Imp—म्रियताम् ॥

